प्रस्तावना.

इह हि समग्रविद्याविद्वज्जनविशारदे कल्पयति कालेऽपि वैयाकरणचक्रचक्रवर्त्तिनो विदितसद्धान्ततत्त्वाः– महोपयोधिनिमग्नाः विश्वोपकारनिखिलशास्त्रार्थमार्गाः शुद्धयोगोद्वहनादिक्रियाकल्पसम्पादनप्रवणाः गतन-मुग्रविहारकरणाकुण्ठितशक्तयः निरन्तरमध्ययनाध्यापनक्रियायां परिदृत्तपरिश्रमाः व्याख्यानाख्यानक्रियायामा-विष्कृतकौशल्याः श्रीमद्विजयनेमिसूरीश्वराः पादपद्माभ्यां पावयन्तः पृथ्वीतलं विहरन्ते विश्वविख्यातास्तेषां प्रसादप्राप्तपरिमाणलवेन कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचितश्रीमच्छब्दानुशासनाध्ययनतो विदित व्युत्पत्तिविचारत्वेन अस्मिन्नसारेऽपारकान्तारे दुःखदुर्दिनायमानेषु दिवसेषु इतस्ततः भविष्यं संभ्रम्यमाणाः प्राप्यस्थानप्रापणपथमनाप्नुवन्तः मतिपदं मतिपत्तिशून्या विषयमुग्धमना अपि मर्त्या भगवत्स्तोत्रैः समुत्तीर्यन्ते-ऽतिमन्यमानेन भगवद्गुणोदन्वद्बिन्दुवर्णनपरायणेन पामरेणापि मया किमपि स्तुतिकल्पलताविरचनात्मकं बालचापल्यमाकलितं तत्र काव्यशुद्धिश्रेय यदि दृश्यते तर्हि संशोधनीया गुणैकपक्षपातिभिः सुधाविद्भिरिति विविधधर्मकर्मधुरंधराणां श्रेष्ठिवर्यमनसुखभाई भगुभाईप्रभृतीनामस्मद्विद्यासाम्यहायभूतानामतीवोपकारं संस्मरन्नुपसंहरामि ॥

यतः

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥१॥

प्रस्तावना.

इह हि समग्रविद्याविशारदचरणविनोदे कलयति कालेऽपि वैयाकरणचक्रचक्रवर्तिनो विदितगद्यात्मकाः– महोपदेशितसत्त्वाः त्रियोक्तिनिर्मितशास्त्रार्थमार्गाः शुद्धयोगोद्वहनादिक्रियाकलापसम्यगासक्तमानावसराः सतत- मुग्रविहारकरणाकुण्ठितकायाः निरन्तरमध्ययनाध्यापनक्रियायां पण्डितपरिश्रमाः व्याख्यानाख्यानक्रियायामा- विष्कृतकौशलाः श्रीमद्विजयनेमिसूरीश्वराः पादपद्माभ्यां पावयन्तः पृथ्वीतलं विजयन्ते विश्वविख्यातनामानस्तेषां प्रसादमासाद्य शिष्येणानल्पेन कलिकालसर्वज्ञश्रीमद्धेमचन्द्राचार्यविरचितश्रीमद्धेमशब्दानुशासनाध्ययनतो विदित व्युत्पत्तिविचारत्वेन अस्मिन्नपारव्याकरणान्तरे दुर्बोधदुर्ज्ञेयस्थानेषु दिवसेषु उत्पन्नः प्रतिदिनं संभ्रम्यमाणाः प्राप्यस्थानप्रापणपथमनानुवन्तः प्रतिपदं प्रतिपत्तिशून्या विपक्षमुखता अपि मया भगवत्स्तोत्रैः समुत्तीर्यन्ते- इतिमन्यमानेन भगवद्गुणोदन्वद्बिन्दुवंदनपरायणेन पामरेणापि मया किमपि स्तुतिकल्पतरोविरचनात्मकं ग्रन्थापल्पाकल्पितं तत्र काप्यशुद्धिश्चेत् परि दृश्यते तर्हि संशोधनीया गुणैकपक्षपातिभिः समायक्षिर्विद्भिरिति विविधधर्मकर्मधुरंधराणां श्रेष्ठिवर्यमनसुखभाई भगुभाईप्रभृतीनामस्माद्ग्रामस्थसद्गृहस्थानामनीवोपकारं संस्मरन्नुप संहरामि ॥

यतः

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ॥
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥१॥

अस्य ग्रन्थस्य विषयानुक्रमणिका.

इति समाप्ता विषयानुक्रमणिका.

॥ स्तुतिकल्पलतायाः शुद्धिपत्रिका ॥



अशुद्धं	शुद्धं	पृष्ठं	पद्यं	पङ्क्तिः
हुते	हृते	१	१	०
पद्मप	इदम्मप	८	८	११
व्रज	व्रज	१	१२	७
हुते	हृते	१	१३	९
विन्दे	विन्दे	२	१३	६
वन्दू	वन्दू	२	१३	५
र्प्यमाणा	र्प्यमाणा	१	१४	५
मर्त्र	सर्व	१	१४	६
ऋ	ह्रू	१	१५	३
विभ्राण	विभ्राण	१	१५	४
इम्	इम्	१	१६	८

दन्त	दत्त	१	१५	९
थानाम्	थानाम्	१	१६	१२
क्रें	क्लें	२	१६	१
दानम्	दान्तम्	१	१७	७
स्तु	स्त	२	३१	८
ज्वर	ज्वल	२	३२	९
जगत्रय	जगत्त्रितय	२	३२	१०
ते	सः	२	३४	६
न्मान	मान	१	३५	१
र्को	त्कौ	१	४५	८
दन	गहन	१	४६	२
मली	माला	१	४७	८
भन्डि	मण्डि	२	४९	१२
स्तुतिकुसुमाञ्जलौ	स्तुतिकल्पलतायां	२	७६	१२

॥ इति समाप्ता शुद्धिपत्रिका ॥

॥ श्री ॥ अर्हं ॥

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमः ॥

॥ भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमः ॥

॥ श्रीमद्विजयनेमिसूरिस्तोत्रमाला ॥

॥ अथ स्तुतिकल्पलतायां प्रथमस्तबकः ॥

॥ अथ शङ्खेश्वरपद्द्वात्रिंशिका ॥

अथ पञ्चदशाक्षरचरणप्रतिमकर्या मालिनीवृत्तम्

असमशमविलासं निर्जराचार्यवाचाप्यगणितमहिमानं शुद्धबोधप्रदोनम्।*
प्रभुमहमथ नौमि त्रायकं विश्वजन्तोरतलकुमतिकूपाकर्षशङ्खेश्वरेशम् ॥१॥

* नगणयुगलयुक्ता मेन मध्ये भयुक्ता यगणयुगलनद्धा शुद्धमोदप्रबन्धा॥ इह भवति न केषां हारिणी चित्तवृत्तेर्मधुरपदविन्यासा मालिनी नागवाहैः ॥ उद्यणिका यथा ।।।।।। ऽऽऽ । ऽऽ । ऽऽ ॥ १ ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्राच्छन्दः ॥

यद्यप्यबुद्धिस्तव सुस्तवेऽहं निःशक्तिको नाथ तथापि मेऽद्य ॥
दोषापनोदक्षमवाग्विलासं त्वां वीक्ष्य चित्तं यतते स्तवाय ॥ २ ॥

अथैकादशाक्षरचरणमुपजातिवृत्तम् ॥

विचित्रमाधुर्यविलासिदेवासुरादिवाक्यैः सुहितश्रुतेस्ते ॥
प्रमोददायी भविता मदीयवाक्काक्षिको देव रुचिप्रदानात् ॥ ३ ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्रावृत्तम् ॥

श्रीपार्श्वनाथं भवघोरकूपसन्तारवाग्दीर्घवरत्रमासम् ॥
सद्बोधनौतीर्णभवाब्धिपारम् वन्दारुसन्तानकमाननोऽस्मि ॥ ४ ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्रावृत्तम् ॥

निःशेषदोषानलनाशनीरम् त्वां ये श्रयन्ते गुणवह्निमेघम् ॥
तानुत्सुका निर्वृतिरेति शीघ्रम् पद्मालया पद्ममिव प्रभाते ॥ ५ ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्राछन्दः ॥

प्राप्तप्रकर्षं कृतपुण्यसारम् जन्माद्यजातं सफलं ममैव ॥
अद्यैव जातो वर्द्धमानपाद्मम् ज्ञाताथ संसारविसारता च ॥ ६ ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि इन्द्रवज्राछन्दः ॥

पद्मावती रक्षति यस्य नत्या तीर्थं जनानां नवधारिवारि ॥
कीर्त्तिप्रतापैर्विराजमानः श्रीपार्श्वराजः सुखराजयेऽस्तु ॥ ७ ॥ •

॥ अथैकादशाक्षरचरणं त्रिष्टुभि उपेन्द्रवज्राछन्दः ॥

शठे कृपालो कमठे व्यधारि यद्रुज्वलदङ्गुःखदङ्ऽनन्ते ॥
न संयके नकिनरान्विते च नवानुरागो धरणेन्द्रराजे ॥ ८ ॥

॥ अथैकादशाक्षरचरणं त्रिष्टुभि उपेन्द्रवज्राछन्दः ॥

• भार्द्रौ गणुर्यंन विरामता यत्र जकारेण विभूषिता याः॥ अन्ते गकारद्वयमण्डिता सा स्यादिन्द्रवज्रा त्रिष्टुभ-प्रसिद्धा ॥ ॥ उदाहरणं यथा ॥ ऽऽ। ऽऽ। ।ऽ। ऽऽ ॥ ■ ॥

इति प्रभो कर्मचमूरजेया समूलमुन्मूलितपुण्यराशिः ॥
यहो उदासीनतया त्वयारम् जिता स्ववीर्येण जगत्पतीश ॥ ९ ॥ *

॥ अथैकादशाक्षरचरणमुपजातिवृत्तम् ॥

त्वत्पादसेवामकरन्दपूर्णम् त्वद्ध्यानभानूदयजातहर्षम् ॥
सतां हृदब्जं समुपैति सिद्धिर्मरन्दलोभाद् भ्रमरीव पद्मम् ॥ १० ॥

अथैकादशाक्षरचरणमुपजातिवृत्तम् ॥

अलब्धपुण्यैरिह दुर्लभं तत् विपच्छिलोच्छेदनवज्रपातम् ॥
वीतात्रयुष्टेस्समभीक्षणम्मे जातं त्वदीयं शमसौख्यमुख्यम् ॥ ११ ॥

अथैकादशाक्षरचरणमुपजातिवृत्तम् ॥

कोपप्रवेशो न तवास्ति देव न रागलेशोऽपि च देव कुत्र ॥

* मुनिनिमोदं रिदूर्णा करोति रितियशोभा जनजैर्गयुग्मैः । उपेन्द्रवज्रा कथिता कवीन्द्रैर्न कस्य हृद्या भुवि सा प्रसिद्धा ॥ ९ ॥

उपेक्षया व्याप्तमिदं जगत्ते न खण्डिता चेश्वरता तथापि ॥ १२ ॥ *

अथ द्वादशाक्षरचरणं जगत्यां वंशस्थवृत्तम् ॥

तव क्रमस्पर्शकरा नरास्तु ये सुखं लभन्ते परमं जिनेश्वर ॥
यतो न किं हेम भवेदयस्तु ते प्रभावतः स्पर्शमणेरगोचरात् ॥ १३ ॥ *

अथेन्द्रवंशावंशस्थयोरुपजातिर्द्वादशाक्षरचरणिका ॥

अवर्णनीयं बहुपापगुम्फितम् यद्यानुभूतं भवदुःखनारकम् ॥
चरित्रकं मे पुरतस्तवाधुना जानासि देवेति कृतं प्रलापकैः ॥ १४ ॥

---

* उपेन्द्रवज्राचरणेन युक्ता स्यादिन्द्रवज्राचरणाभिरामा । कवीन्द्रवर्यैः कथितोपजातिः तस्याः प्रभेदा बहवः प्रसिद्धाः ॥ चतुर्दशोपजातयस्तासां नामानि ॥ कीर्तिर्वाणी माला शाला हंसी माया जाया बाला ॥ आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिर्नामामाख्याः ॥ १२ ॥

* नगौ जगौ रः प्रतिभाति पुष्पिताग्रा च पाश्चात्ये भवेत् । तौ जकारौ रगणश्च भासते वनीहि वंशस्थविलमाहतं ॥ १३ ॥

अथेन्द्रवंशावंशस्थयोरुपजातिर्द्वादशाक्षरचरणिका ॥

नमत्सुधाभुक्पतिपूजितक्रमः श्रीकेवलज्ञानत्रिलोचनाश्रितः ॥
त्वमीक्षसे नाथ जगत्त्रयं सदा अतस्त्रिनेत्राय नमो नमोस्तु ते ॥ १५ ॥*

॥ अथैकादशाक्षरचरणं त्रिष्टुभि शालिनीवृत्तम् ॥

भुक्त्वा भुक्त्वा भोज्यसारं त्रयेषु तृप्ता दृप्ता नैव लोकाः कदाचित् ॥
जातास्ते न त्वद्वचःपानकेन तुष्टेः पुष्टेर्धारकाः शान्तचित्ताः ॥ १६ ॥
त्राता त्राता सर्वविश्वस्य चासि धृत्वा धृत्वा केवलं वर्तमानः ॥
जातस्नान त्वन्तु लोकोपकारी सेव्यो देव्यो नैव केषां जनानाम् ॥ १७ ॥
सारा धारा मेघधारेव वाचो रोढुं रोढुं सारसौख्यालिवाञ्छिम् ॥

*स्यादिन्द्रवंशाचरणाभिधाभिया मवद्वंशस्थचरणपूरिता ॥ विद्वन्मनःकैरवमोदचन्द्रिका ख्यातोपजातिर्भुवि चापरा बुधैः १५

मारापारस्मेरदर्पौघहन्त्री यस्य त्रस्यत्पापराशिं नुमस्तम् ॥ १८ ॥

भ्रान्त्वा भ्रान्त्वा घोरसंसारदावे श्रान्ताः श्रान्ता जन्तवो देवदेव ॥
नत्वा नत्वा त्वत्पदाम्भोजयुग्मं हत्वा हत्वा कर्मसङ्गं विमुक्ताः ॥ १९ ॥

हारं हारं सर्वमोहान्धकारं कारं कारं सर्वपापप्रणाशम् ॥
नव्यं नव्यं देव दत्से जनानाम् तारं तारं घोरसंसारवार्धेः ॥ २० ॥ *

जितश्रमं जितात्मानं जितामित्रं जितेन्द्रियम् ॥
जिनेन्द्रं जितदं नौमि जित्तमं तं जितामयम् ॥२१ ॥

सर्वसज्ज्ञानसम्पन्नं परब्रह्मप्रतिष्ठितम् ॥
देवेन्द्रपूजितं देवं वन्दे शङ्खेश्वरं वरम् ॥ २२ ॥
सुवर्णकं तं धर्माणां सुवर्णच्छविविग्रहम् ॥

---

* इसारम्भूर्नर्शाजिनोरामर्शामिः विजाहादं म्नां नगां गन्दधाना ॥ कुर्याच्चेयं कस्य संश्रूयमाणा मार्गैः मोक्ता शालिनी वेदलोकैः ॥ उदाहरणं यथा । SSSSS । SS । SS ॥ २० ॥

सुवर्णनीयचारित्रं सुवर्णवचनाकरम् ॥ २३ ॥
सर्वदा धर्मयन्तारं सर्वदा धर्मदायकम् ॥
धर्मेशं धर्मवर्माणं वन्देऽहं धर्मदेशकम् ॥ २४ ॥
ज्वलज्ज्वालावलीरक्तभासा जाजासिनो नखाः ॥
विघ्नं निघ्नन्तु देवेश पादपद्मोद्भवास्तव ॥ २५ ॥ *
महोभिः श्रीमद्भिर्भुवनमथ चोद्दीपयति यः
यतः प्राप्तो धर्मः सुरतरुवरो मोक्षफलदः
ह्यनन्तैः संशान्तैर्विबुधजनवन्द्यं क्षितिपतिम्
स्तुवे श्रीशान्तेशं जिनवरमहन्तं प्रतिदिनम् ॥ २६ ॥
भवारण्ये नृणां चिरमपि च सुभ्रान्तमनसाम्
सदा शान्त्यावासं तव मुखमहं नाथ शमदम्

* पादे सर्वत्र गुरुः स्याद्द्वितीयः पञ्चमन्तथा । सप्त लघुः भवतय यत्र तद्धिद्ध्यनुष्टुभम् ॥ २८ ॥

निरीक्ष्यास्तक्रोधो ऽत्रामिह तु संसारावापन्ने
यतः के च स्युर्नो ह्यमृतजरमापीय विजराः ॥ २७ ॥
सदा मोहव्द्रोहप्रकटनपरस्य क्षितिपते-
र्व्यपारेका त्वेका समवसरणे गीस्तव वरा ॥
ह्यसारां व्याधारां भवजलनिमग्नां जिन धराम्
समुद्यच्छन्ती सा सकलनरमोदा विजयते ॥ २८ ॥
ज्वलत्काष्ठज्वालावृततनुरहिर्दारसहितः
प्रसादात्तेऽलभ्यादमरपदवीं प्रापद्य सः ॥
जनाः सर्वे धर्मे समजनिषताथ त्वदतुल-
प्रजावप्रज्ञानात् प्रसितमनसः शान्तमतयः ॥ २९ ॥
ह्यमी पार्श्वाधीशा विमलगुणजातान् विदधतू-
पसर्गाणां सेना ज्वलदनलवद्भीतिजरदा ॥

अलक्ष्यासह्या यैर्वहुकलितदुःखानृनयनैः
त्रिलोकीं भिन्दाना शठकमठजाता समसहि ॥ ३० ॥
सदा देवासेवान्त्यजत उपकाराय सहसा
यहूनां हूनानां क्षितितलमलंकुर्वत इव ॥
जराजीर्णा दीर्णाः स्नपनजलतस्तेऽमृतभुजः
प्रसन्नाः संपन्ना यदुकुलभवारूपमतुलम् ॥ ३१ ॥ •
श्रीदेवासुरसंस्तुतक्रमयुगो भव्याब्जभानूदयः
श्रीदेवत्वमचिन्त्यशक्तिकलितः पापप्रणोदक्षमः ॥
आश्चर्यं प्रतिभाति यच्छिवपदे दूरेऽपि संस्थायको
भव्यानां विपदः करोपि विपदाः सत्सौख्यकल्पद्रुम ॥ ३२ ॥

• भवेत्पूर्वं यस्यां यगणरचना येन सुभगा । ततः पश्चान्नस्यात्सगणसहितो भेन कलिता ॥ लघुर्गान्त्याविति विमलवर्णा ...

स्याद्वादामृतवापिका जगवतां यद्वक्त्रनिःस्यन्दिनी
गीः शृण्वन्नरनाकिलोकहृदयानंदाश्रुदानक्षमा ॥
मुग्धान्तस्थितकश्मलोद्भृतितिमिरव्राते तु सूर्यप्रभा
श्रीपार्श्वः स करोतु भव्यजनिनामानन्दवृद्धिं सदा ॥ ३३ ॥
त्वन्नामस्मरणाद्भवन्ति विबला व्याघ्रादयः प्राणिनः ॥
त्रैलोक्यं स्वबलाज्जिगमिषुरिव यो दंदह्यमानो दवः
सोऽपि त्वत्स्मरणाद्धिमूढनरवत् किञ्चिन्न कर्तुं क्षमः ॥
स त्वं वाञ्छितदायको विजयसे शङ्खेश्वर श्रीप्रभो ॥ ३४ ॥
अद्यैवोत्तमताजनि शिरसो यत्त्वन्नतेः साधनम्
हस्तौ मे सफलत्वमञ्जलिकृतेरासौ जिनेशस्य ते ॥
अद्यैवोत्तमतां दधाति दिवसो मे प्राप्तपुण्योदयः
इत्याह्लादभरेण नौम्यजयदं शङ्खेश्वरं सौख्यदम् ॥ ३५ ॥

मोहव्याप्तजगन्महोदयकृते त्यक्त्वा समृद्धिं पराम् ॥
स्वन्तीर्थङ्करकर्मशर्मकरणं धृत्वा स्वबोधात् ततः ॥
श्रीदीक्षां शिवसौख्यद्रुतिमधरः पश्चाच्छिवस्थानकं
कैवल्येन करस्थितामलकवत् पश्यंस्त्रिलोकीं गतः ॥ ३६ ॥

॥ कविनामगर्भचक्रबन्धः ॥

यस्मादाविरभूत् स्तुतागमवरोऽरिग्रामजील्यत्ययः
शोभाढ्यो महितः शिवाय महतामानन्ददानां वरः ॥
विश्वव्याप्तजयार्त्तिनाशमतुलं यं प्राप्य लेभे शुचिः
जय्या यस्य नमामि पार्श्वमनिशं तद्धर्मसेना तता ॥ ३७ ॥*

* सूर्याश्वै र्विरतं बुधैरिह भवेत् पूर्वं मसंज्ञो गणस्तस्मात्स्यात्सगणस्ततश्च जगणस्सस्स्यात् ततोनन्तरम् ॥ तस्मात्तथ ततस्स एव यदि चेदेकेन गेनान्वितः । यस्मिँस्तत्कथितं विशुद्धमतिभिश्शार्दूलविक्रीडितम् । उदाहरणं यथा । SSS ॥ S । S । । । SSS । SS । S ॥ ३७ ॥

॥ स्तुत्यस्तोतृनामगर्भो बीजपूरबन्धः ॥

जय शंस्यसह्लाद जय खेचरसौग्यद ॥
जयेश्वर यशोह्लाद जयारं विजयप्रद ॥ ३८॥

॥ स्तुत्यनामगर्भो बीजपूरबन्धः ॥

जय शस्यगुणश्रीक जय खेदप्रभेदक ॥
जयेश्वर शिवश्लोक जय रम्ययशोऽधिक ॥ ३९ ॥
अद्य मे सफला सूक्तिः अद्य मे सफला मतिः ॥
अद्य मे सफलं जन्म अद्य मे सफलं फलम् ॥ ४० ॥

इत्येवं स्तुतिर्जियशोविजयइत्याख्येन शिष्याणुना
श्रीमन्नेमिविजोः पदाम्बुजयुगध्यानप्रभावात् स्तुताः ॥
श्रीशङ्खेश्वरमण्डनाः क्षितितले भव्यावलीसेविताः
सन्तापन्तु हरन्तु भव्यजविनां पार्श्वाधिराजाः सदा ॥ ४१ ॥

धीनेमीश्वरसूरिराज्यसमये नाडे सिते पञ्चमी-
निध्यां नायपुरेऽजयन्मम परो यत्नः स एष प्रभोः ॥
धीनेमीश्वरसूरोः पदयुगध्यानप्रसादादरं
साफल्यं समवाप पापहरणः प्राज्ञप्रमोदावहः ॥ ४२ ॥

॥ इति [illegible] नमोऽस्तु वि
[illegible] स्तुतिकल्पल-
ताया: [illegible] पार्श्व [illegible] विविधच्छन्दो [illegible]

॥ समाप्त ॥

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमो नमः ॥

॥ भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः

अथ स्तुतिकल्पलतायां द्वितीयस्तबके

त्रिविधनामगर्भच्छन्दोमयमुक्तक-

श्रीपार्श्वजिनेश्वराष्टकम्

॥ श्रीपार्श्वाष्टकं द्वितीयं स्तोत्रम् ॥

अथैकादशाक्षरचरणं त्रिष्टुभि बन्धुवृत्तम् ॥ (कुत्रचित्तु दोधकमित्यपि)

पार्श्वजिनं जवजीतिनिरासम्

मायिकपाशविनाशनदक्षम् ॥

शनयारिनिवारिततापम्
बन्धुमहं सकलस्य नतोऽस्मि ॥ १ ॥

अथ मत्तोद्गानशरणमभिजगत्या मायाछन्दम्

लोकार्धीशैर्नाकिजरेणानतपादम्
यस्मिँश्चेतो लग्नमपापं जविता ते ॥
सर्वानन्दग्रामसुदारं जयिन्बन्धो
त्यक्त्वा मायां लोकमपि त्वं भज पार्श्वम् ॥ २ ॥

• भवतीभिर्नासनिदं मत्तपरभ्रमुखगणिबन्धम् । कन्याभिधं प्रथितं भुवि विम्बोपिकसंज्ञमिदं मथितश्च ॥ लक्षणमस्य यथा ॥ ऽ।ऽ ऽ। ऽ। ऽऽ ॥ १ ॥

• अभिन्नः पूर्वं मगणमनथादि यत्नाभावानन्त्यगणादृगणाख्यः ॥ गान्धोत्कटा विश्रमतो मोददर्पण भाति मोस्य विरतैः पदस्य नु ॥ लक्षणमस्य यथा ॥ ऽऽऽ ऽऽ। ।ऽऽ ।।ऽऽ । पद्मजमधुरपिच्छपविन्दन्ति ॥२॥

॥ अथ द्वादशाक्षरचरणं जगत्यां तामरसवृत्तम् ॥

(अजिननतामरसमित्यन्यत्र)

सुरहृदयालिनिपीतमरन्दो-
पमशुभदेशनवाचमुदारम् ॥
कलुषनिदाघहरं जनताया-
स्तव मुखतामरसं जिन जीयात् ॥ ४ ॥ •

अथ त्रयोदशाक्षरचरणमतिजगत्यां मत्तमयूरम्‌ ॥

(मञ्जुभाषिणीत्यपि अन्यत्र) •

परिजूतमानसतया मनोज्ञवा
हृतधर्मशेवधिचयाश्शरीरिणः ॥

• नगणविलास इतः परमेव । जगणनिबन्धकृतिः भुजगा च ॥ जयति ततः परमेव जकारो यमणयुतो यदि तामरसं तत् ॥ उदवर्णिका यथा । ।।। ।ऽ। ।ऽ। ।ऽऽ ॥ ४ ॥

भवता जिनेन्द्र सहसा प्रबोधिता-
स्सुखमाप्नुवन्ति मदमाननिद्रया ॥ ५ ॥

॥ अथ चतुर्दशाक्षरचरणं शक्वर्यामपराजितावृत्तम् ॥

जिनवरवृषभः फणीन्द्रसुवन्दितो
गुणमणिनिकरो जगत्पतिरीश्वरः ॥
सकलसुरनरेश्वराद्यपराजिता-
तुलबलधरणो दधातु शिवश्रियम् ॥ ६ ॥

सगणो भवेत् प्रथममेव गुम्फितो । जगणस्ततस्सगणशोभितस्ततः । जगणः पुनर्गुरुयुतो यदा तदा कथिता सुधीरिह सा प्रबोधिता ॥ उदवणिका यथा ॥ ॥ऽ ।ऽ। ॥ऽ ।ऽ। ऽ ॥५ ॥

नगणयुगयुता रकारविराजिता । सगणयुतपदा लघुभविमणिमता । जयति गुरुयुता बुधभवैरियं । स्वरविरतिरहिता त्वपराजिता ॥ उदवणिका यथा ॥ ॥। ॥। ऽ।ऽ ॥ऽ ।ऽ ॥ ६ ॥

अथ षोडशाक्षरचरणमष्टयां चञ्चलाछन्दः ॥

चञ्चला बुधेह चञ्चला सुतादिवर्ग एव
ते जनत्यवश्यमेव मोहपाशबन्धनेन ॥
दुःखदावदाहदानकारणं सदाश्रयेह
तच्चयोदधिप्रघोरदुःखनाशपार्श्वमाशु ॥ ७ ॥

अथ विंशत्यक्षरचरणं कृत्यां चित्रनामकं वृत्तम् ॥

क्रोजमोहमानकालसर्पसंकुले नवाग्न्यकाननेऽत्र
कर्मवर्गवैरिपातितो जनो नृशं विहूनचेतसा तु ॥

॥ यत्र गणियो गणः पुरस्सरो जगंद्गतोऽत्र । गजितेन मणिडतो गणेन जन्मतः पुनश्च ॥ कीर्तितो रसंज्ञको गणश्च शान्तिमं गुणेन । चित्रसंज्ञकमीरितं बुधवर्णदायकन्त्र ॥

- वृत्तनिष्ठ यथा ॥ ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ- ॥ ७ ॥

त्वत्पदाब्जसेविनां निरीक्ष्य दुःखजारनाशमप्यहो न
चित्रमेतदेव जाति यत्तथापि सेवते जवन्तमाशु ॥ ८ ॥*

॥ अस्य प्रभ्रज्ञानामकस्य वृत्तस्य चित्रसंज्ञतया प्रसिद्धत्वात् चित्रसंज्ञतया एव लक्षणं लिख्यते ॥

अथ स्तुत्यनामगर्भो बीजपूरः
जगज्जन्तुसमुद्धार जप्य पार्श्वप्रमुत्कर ।
जराश्वत्र शुजाकार जयाह्लाद यशस्कर ॥ ए ॥

श्रीनेमीश्वरसूरिराज्यसमये तस्य प्रतापादिदं
स्तोत्रं श्रोत्रसुखावहं विरचितं श्रीपार्श्वनाथस्य यत् ॥

* ॥ पूर्वमेव राजिघो गणस्ततो जवेज्जसंज्ञको गणस्तु । राजिधस्ततो जवेज्जसंज्ञको गणः पुनश्च राजिधोऽथ ॥ जाजिघो जवेद्गणः पुनः पुनर्गुरुस्ततो जवेद्लघुश्च एक एव चेत्तदा प्रतीहि चित्रनामकं बुध त्वमत्र ॥ १ ॥
॥ उदाहरणं यथा ॥ ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ।ऽ ।ऽ। ऽ। ॥ ८ ॥

तेनाकल्पमिहाश्रयन्तु सुधियः श्रीपार्श्वनाथं जिनम्
सद्धर्मप्रतिपन्नजायनगरे स्तुत्यं वरं श्रेयसे ॥ १० ॥

श्रीपार्श्वस्तवनं पठन्ति सुवि ये ते प्राप्तपुण्याशया
लोकाः श्लोककदम्बपुष्पकलिता धर्मद्रुमाः सर्वदा ॥
श्रीमन्नीतिफला भवन्ति विनयप्रोद्भूतमूलाश्चिरम्
कल्याणावलिवल्लिवेष्टनकृतच्छायाः सुसेव्याः सताम् ॥ ११ ॥

इतिश्रीवसुमतीहारायमाणकीर्तिलतामण्डपेहिताचारित्रमूर्तिधर्मकल्पद्रुमश्रीविजयनेमिसूरिपादारविन्दमकरन्दतु-न्दिलमिलिन्दायमानयशोविजयमुनिकृतायां स्तुतिकल्पलतायां द्वितीयस्तबके विविधनामगर्भच्छन्दोमय-मुक्तकश्रीपार्श्वजिनेश्वराष्टकं समाप्तिमगमत् ॥ ० ॥

श्री चतुर्विंशतिजिनेश्वरेभ्यो नमः ॥

जगद्वन्द्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमः ॥

अथ स्तुतिकल्पलतायां द्वितीयस्तवके प्रथमैकवचनान्तपदैः

श्रीचिन्तामणिपार्श्वनाथस्तवनप्रारम्भः ॥

श्रीचिन्तामणिपार्श्वाष्टकं तृतीयं स्तोत्रम्.

श्रीचिन्तामणिपार्श्वनाथममरस्तुत्यक्रमाम्भोरुहम्
दर्पोद्दामकरीन्द्रकुम्भदलनप्रख्यातकण्ठीरवम् ॥
क्रोधक्रूरभुजङ्गगर्वगिलनश्रीवैनतेयोपमम्
स्तोष्येऽहं प्रथमान्तशब्दनिवहैरेकत्वसंराजितैः ॥ १ ॥

जयत्यखिलखेचरप्रखरमौलिरत्नप्रभा-
प्रभासितपदाम्बुजप्रचलरेणुपुञ्जेन्दिरः ॥
निरस्तजनमानसप्रभवदर्प्पकाडम्बरः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ २ ॥
जयत्यतुलविक्रमप्रहतमानमायानल-
प्रजातज्वररोगकप्रशमनप्रजाताङ्कुरः ॥
विपद्व्रजधराधरोद्दलनवज्रपातस्मृतिः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ३ ॥
जयत्यघजरोद्भवप्रबलदुःखदावानल-
प्रदूनजविमालसप्रशमदानधाराधरः ॥
विमुञ्जनवमल्लिकाकुसुममित्रकीर्त्तिव्रजः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ४ ॥

जयत्यमरदीर्घिकाजलजजालगर्वापहृ-
प्रसृत्वरविलोचनप्रशमितोग्रपापज्वरः ॥
प्रमोहरजनीशतक्षपणवाक्यजानूदयः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ५ ॥
जयत्यवनिसंस्थिताखिलकुसृष्टिवादप्रथा-
निरस्तजविसन्मतिप्रबलदानकल्पद्रुमः ॥
प्रनीपणजयार्णवप्रबलकर्णधारक्रमः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ६ ॥
जयत्यसमसद्युतिप्रकरसारपीयूषक-
प्रसिञ्चनकृतावनिप्रबलशान्तिसङ्क्रमः ॥
सुधासमसमुज्ज्वलवचनजातवेगोऽङ्कुरः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ७ ॥

जयत्यजितविक्रमप्रवरकुन्तवेगोद्भवत्
समग्रकलुषद्रुमोरुवनदहनदहनानलः ॥
समस्तभुवनोद्यप्रथनवेनलेयागरः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ८ ॥

जयत्युरुगुणावलिप्रमितचित्रमुक्तामयः
प्रकाशितचरणावगत्युदितशुक्लजैनागमः ॥
अचिन्त्यचरितोज्ज्वलस्फुरज्ज्वलननाशपल्लवच्छविः
प्रभूतकरुणारसप्रसरणस्स चिन्तामणिः ॥ ९ ॥

अथानुष्टुप्छन्देन भुवनामग्री श्रीनवरत्नकः ॥

जय चिन्तावजोङ्कार जय तापहराङ्कुर ॥
जय मन्युपूसंहार जयोग्निफुस्तुतसंवर ॥ १० ॥

अथ शार्दूलविक्रीडितवृत्तेन कविनामगर्भचक्रबन्धः ॥

यः सौख्यं विदधाति भव्यभविषु प्रौढप्रतापोदयः
शोकं हन्ति स सर्वभूतभयसंह्रारो विहारो गिराम् ॥
विज्ञानप्रसुवां सुरेन्द्रनरसंपूज्योमहर्षिः सदा
जन्तुक्रोधशमः शिवाय भविनां भूयात् स चिन्तामणिः ॥११॥

श्रीनेमीश्वरसूरिराज्यसमये भव्यारविन्देनभा-
विद्वत्कैरवचन्द्रिका समजनि प्रौढप्रभावस्मृतेः ॥
तस्यैवातुलतेजसो मम गुरोरेषा स्तुतिः पावनी
यावद्भूमिरतो धराधरधरा तावज्जनैः पठ्यताम् ॥ १२

एनां पार्श्वगुणप्रवाहकणिका वोधेन धर्मद्रुम
प्रोल्लासामलशान्तिवारिविसरप्रोद्धर्षिणीं मानवाः

अज्ञेनापि मया कृतां नयत भोः किं वर्द्धितः पावको
मूढेनापि न तार्णकूटदहने प्रौढप्रभावो भवेत् ॥ १३ ॥
एषा यशोविजयसंज्ञकृता तनोतु
मोदप्रथां बुधजनस्य किमस्ति तेन ॥
श्रीपार्श्वपादयुगले तु समर्प्यमाणा
पापानि सर्वजविनाशिह निष्पतीह ॥ १४ ॥
श्रीनेमिसूरिपादाब्जप्रभावविहिता स्तुतिः ॥
पठ्यमाना सदा भूयात्सर्वकल्याणकारिणी ॥ १५ ॥

निगमकुरङ्गगणविदारिणसिंहावतारकल्पसत्तर्कतर्कमहोपदेशामृतसेकसंवर्धितनव्यजनहृदयद्रुमानिशर्मद-
जिनोपज्ञस्याद्वादसिद्धान्तमारककारणप्रख्यातानाचार्यवर्यश्रीमद्विजयनेमिसूरीश्वरपादपङ्कजमिलिन्द-
यशोविजयमुनिना विरचितायां स्तुतिकल्पलतायां प्रथमकल्पनाम्नि[illegible]श्रीचिन्ता-
मणिपार्श्वाष्टकं तृतीयं स्तोत्रं

समाप्तम् ॥

श्रीचतुर्विंशतिजिनेभ्यो नमोनमः
जगद्गुरुः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमोनमः ।
अथ पूर्तिरूपाणामलंकारे
प्रथमगन्धर्विंशतिकाः श्रीदादापार्श्वनाथस्तवनानि ॥

दादापार्श्वाष्टकं तृतीयं स्तोत्रम्

अकारान्तद्विर्नीयान्तपदैर्यासगौरवैः ॥
स्तोष्ये दादानिधं पार्श्वं क्लेशप्रशमकारिणम् ॥ १ ॥
...भवतारं शुभसम्भवारं भवाब्धिपारं शिवसौख्यकारम् ॥
...नारं विबुधेरमारं कुबोधवारं जगदेकसारम् ॥ २ ॥
...शं जगतामधीशं जराद्विषीशं सुखमित्रजेशम् ॥
...सेनाशं मुनिजालकीशं असोजपाशं कृतशान्तिवेशम् ॥ ३ ॥

छिन्नप्ररोपं कृतकर्मशोपं दयाप्रपोषं हृतबुद्धिदोषम् ॥
यशःप्ररूपं सुखवारिकूपं कृतप्रतोषं शुभमार्गघोषम् ॥ ४ ॥
गतप्रशोकं भुजवल्लिसेकं चन्द्रप्रभाकं मुखमुज्ज्वलाढ्यम् ॥
चित्राणमेकं गतमोहरेकं गतारिजीकं मदनीयनाकम ॥ ५ ॥
भवभञ्जेदं सकलार्थवेदं विमुक्तखेदं परिबोधनादम्
जवामयोदन्तत्रिजेद्वियादं कल्याणकादम्बपयोदनादम् ॥ ६ ॥
अतुल्यदेहं गुणराशिगेहं धर्मप्ररोहं सततश्रिरीहम् ॥
ज्ञानैः सुधाहंकृतिसम्प्रदाहं कृपाप्रवाहं दधतं विदाहम् ॥ ७ ॥
सर्वैकगेयं शुणतो ध्यमेयं दन्तप्रदेयं परिमुक्तहेयम्
कामाधजेयं परिचिन्त्य कार्यं विमुक्तमायं भुवदेशगायम् ॥ ८ ॥
ज्ञानप्रदानं कलुषापदानं लोकत्रयव्यापियशोवितानम् ॥
संखण्डितोद्यन्मदकाममानं दादाजिधं पार्श्वजिनं स्तवीमि ॥९॥
अपूर्णः कुसुम

श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमोनमः

जगद्गुरुः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमोनमः ।

अथ स्तुतिकल्पलतायां तृतीयस्तबके

अकारान्तद्वितीयान्तपदैः श्रीदादापार्श्वनाथस्तवनमारभ्यते ॥

दादापार्श्वाष्टकं तृतीयं स्तोत्रम्

अकारान्तद्वितीयान्तपदैरर्थातिगौरवैः ॥
स्तोष्ये दादाभिधं पार्श्वं क्लेशप्रशमकारिणम् ॥ १ ॥
कृपावतारं शुभसम्प्रचारं भवाब्धिपारं शिवसौख्यकारम् ॥
कृतोपचारं विबुधैरमारं कुबोधवारं जगदेकसारम् ॥ २ ॥

श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमोनमः

नगवज्जयः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमोनमः ।

अथ स्तुतिकल्पलतायां तृतीयस्तबके

अकारान्तद्वितीयान्तपदैः श्रीदादापार्श्वनाथस्तवनमारम्भः ॥

दादापार्श्वाष्टकं तृतीयं स्तोत्रम्

अकारान्तद्वितीयान्तपदैरर्थात्तगौरवैः ॥
स्तोष्ये दादाजिनं पार्श्वं क्लेशप्रशमकारिणम् ॥ १ ॥
कृपावनारं शुभसम्प्रचारं भवाब्धिपारं शिवसौख्यकारम् ॥
कृतोपचारं विबुधैरमारं कुबोधवारं जगदेकसारम् ॥ २ ॥
कृतोपदेशं जगतामधीशं जराहिवीशं मुखमित्रलेशम् ॥
प्रभासिताशं स्तुतिजासकीशं अलोभपाशं कृतशान्तिवेशम् ॥ ३ ॥

त्रिलप्ररोपं कृतकर्मशोषं दयाप्रपोषं हृतबुद्धिदोषम् ॥
यशःप्रजूपं मुग्धचारित्रपं कृतप्रतोषं शुभमार्गघोषम् ॥ ४ ॥
गतप्रशोकं शुभवल्लिसेकं चन्द्रप्रभाकं मुग्धमुज्झिताङ्कम् ॥
त्रिज्ञाणमेकं गतमोहरेकं गतारिनीकं महनीयनाकम् ॥ ५ ॥
अवद्यभेदं सकलार्यवेदं विमुक्तखेदं परिबोधनादम्
जवामयोदन्तविनेदिवादं कल्याणकादम्बपयोदनादम् ॥ ६ ॥
अतुल्यदेहं गुणराशिगेहं धर्मप्ररोहं सततप्ररीहम् ॥
ज्ञानैः सुधाहंकृतिसम्प्रदाहं कृपाप्रवाहं दधतं विदाहम् ॥ ७ ॥
सर्वैकगेयं गुणतो ह्यमेयं दन्तप्रदेयं परिमुक्तहेयम्
कामाद्यजेयं परिचिन्त्य कार्यं विमुक्तमायं ह्युपदेशवायम् ॥ ८ ॥
ज्ञानप्रदानं कलुपात्तदानं लोकत्रयव्यापियशोवितानम् ॥
संखण्डितोद्यन्मदकाममानं दादानिधिं पार्श्वजिनं स्तवीमि ॥९॥

अमुनिः कुशलस्य

अथोपजातिवृत्तेन स्तुत्यनामगर्भो बीजपूरकमबन्धः ॥

अतुल्यदानं गुणिलोकसारं अच्यँ विदाहङ्कृतकर्मपारम् ॥
अघौघजेदं स्मरदाहहारं अञ्जास्यपार्श्वं प्रणमाम्युदारम् ॥ १० ॥

अथानुष्टुब्वृत्तेन स्तुत्यनामगर्भो बीजपूरकमबन्धः ॥

जय दारिद्र्यसम्पात जय दानवपूजित ॥
जय पार्थिवशंघात जय श्वःश्रेयसा तत ॥ ११ ॥

यः श्रीसौख्यनिमग्नचित्तकलितः सम्प्राप्तयापठ्ययः
शोचाधाननिधानकायललितो लीलागृहं ब्रह्मणः ॥
विख्यातः सकलावदातचरितैर्धर्मद्रुमारामको
जन्तुक्लेशतृणौघदावदहनो दादाख्यपार्श्वोऽवतात् ॥ १२ ॥
श्रीनेमीश्वरसूरिराज्यसमये तस्य प्रजातप्रथा-
ध्यानोन्मूलितमोहसन्तमससन्दोहेन पार्श्वस्तुतिः ॥

प्राज्ञानन्ददा यशोविजय इत्याख्यावता साधुना
एषा निर्मितिमाप्य भव्यजनतापापं भिनत्तु द्रुतम् ॥ १३ ॥
श्रीपार्श्वस्तवनं भणन्ति हृदये सन्ध्याय दादाभिधं
पार्श्वं ये शिववल्लिरोहजलदं ते प्राप्तपुण्योत्कराः ॥
भव्या वैभवचक्रवालकलिता धर्मालवालोत्थित-
व्रतश्रीलतिकामहोदयफलप्राप्त्या कृतार्था भुवि ॥ १४ ॥
प्राज्ञस्तोमसुकर्णमोदजननी भव्यावलीकन्धरा
मुक्तालीव मनोहरा विजयिनी लोके चमत्कारिणी ॥
भव्यैर्वैभववृन्दवाञ्छनपरैः सम्भण्यमाना निशम्
यावच्चन्द्रदिवाकरम्वितनुतात् संस्फीतिमेषा स्तुतिः ॥ १५ ॥
इति प्रसंस्तुतः पार्श्वो नेमिसूरिप्रसादतः ॥
शिवाय भव्यजीवानां भूयात् सम्भूतितारकः ॥ १६ ॥

॥ इति श्रीमन्निखिलविद्यासम्राट्शासनसम्राट्सूरिचक्रचक्रवर्तिश्रीमद्विजयनेमिसूरीश्वरपादाम्बुजनिर्भरभ्रमर-
विनेयमुनिवरविबुधशिरोमणिविजयविज्ञानविरचितायां स्तुतिसन्दोहनाम्न्यां कृतौ तृतीयस्तवरूपं
अकारादिहकारान्तपदरचनामयपार्श्वाष्टकं श्रीमद्विजयनेमिसूरीश्वर-
समाप्तम् समाप्तम् ॥

॥ श्रीवर्धमानजिनेन्द्रेभ्यो नमः
जगद्गुरु श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः
अथ स्तुतिसन्दोहनाम्न्यां कृतौ चतुर्थस्तवं
अकारादिहकारान्तपदैर्गुम्फितं
श्रीभाभापार्श्वनाथस्तवनाष्टकम्

भाभापार्श्वाष्टकं चतुर्थं स्तोत्रम्

अकारान्तहकारान्तपदैरर्थैश्च गुम्फितैः ॥
सुरासुरनरस्तुत्यं हतकर्मव्रजं विभुम् ॥ १ ॥

न विद्यन्ते स्वरा यत्र इकाराद्या बुधेश्वर
पदैरेवंविधैः स्तोष्ये पार्श्वं जाजाभिधानकम् ॥ २ ॥

युग्मम्

सारं नयापारपयःप्रतारयानं जगज्जन्मजराप्रणाशम् ॥
आनन्दकन्दप्रजवप्रवाहं जाजाख्यकं पार्श्वमहं प्रपन्नः ॥ ३ ॥
माङ्गल्यकारं हतमानसारं पापापहारं गतकर्मजारम् ॥
सन्न्यासधारं मदपाशहारं जाजाख्यकं पार्श्वमहं प्रपन्नः ॥ ४ ॥
ज्ञातार्थजालं जनधारपालं सर्वार्थदानं सकलप्रकान्तम् ॥
मायानलव्रातजलप्रपातं जाजाख्यकं पार्श्वमहं प्रपन्नः ॥ ५ ॥
आमप्रणाशं वरदानदक्षं दुग्धामयव्रातबलापकर्षम् ॥
नष्टान्तरव्रासहनप्रपञ्चं जाजाख्यकं पार्श्वमहं प्रपन्नः ॥ ६ ॥
शश्वत्प्रजप्यं सततं प्रकाम्यं ब्रह्मप्रदानं पुरुषप्रधानम् ॥
परान्नशक्रं गनपाशचक्रं जाजाख्यकं पार्श्वमहं प्रपन्नः ॥ ७ ॥

माहात्म्यभासं सकलप्रभासं प्रकान्तजालं गतगर्वकालम् ॥
ध्वस्तप्रपञ्चं प्रवराप्तवाचं नानाभ्यकं पार्श्वमहं प्रपन्नः ॥ ८ ॥

अज्ञानकाननघनञ्जयमात्तमध्यं मागन्धकारशमनप्रबलार्ककल्पम् ॥
संसारसागरगदत्मसमग्रनाथं नानाभ्यपार्श्वमहमामहरं प्रपन्नः ॥ ९ ॥

मत्पादपङ्कजपरागकृपावलम्बं स्फारापपापशवचनप्रजराजवत्सलम् ॥
कर्माशयद्वपणगन्धवरापवर्गं नानाभ्यपार्श्वमहमामहरं प्रपन्नः ॥ १० ॥

॥ अथ स्तुत्यनामगर्भो बीजपूरकबन्धः ॥

जगद्भास तमोहार जनजानकरेश्वर ॥
जय मारमदोद्धार जय देव शमाकर ॥ ११ ॥

॥ अथ कविनामगर्भचक्रबन्धः ॥

यः स्वैरं रमते गुणैर्हतमदः पार्श्वः प्रजाबोदयः ।
शोपः कर्मनयस्य बोधितजनः कल्याणकेलीगृहम् ॥

विश्वश्रेष्ठगुणः प्रकाशितमहत्सिद्धान्तसारागमः ।
जन्तूद्धारकरो वरः कृतपदो निर्वाणगेहेऽवतात् ॥ १२ ॥

श्रीनेमिसूरिसाम्राज्ये यशोविजयसाधुना ॥
रचिता स्तुतिराकल्पं पठ्यतां सर्वकामदा ॥ १३ ॥

शृण्वन्ति सुधियः स्तोत्रमेतत्पार्श्वस्य ये त्विह ॥
ते वैनवजरा यान्ति महोदयफलं परम् ॥ १४ ॥

प्राज्ञानन्दपदं स्तोत्रमेतद्भव्यसुखावहम् ।
पठ्यमानं जनैः सर्वर्द्धिं प्राप्नोतु सर्वदा ॥ १५ ॥

इति श्रीकविराजिनकुलहृदयसरोजभृङ्गायमाणनवनकलिकलुषकम्पननिरोधमुसायुजनविजयरिग्नाय
श्रीमद्विजयनेमिसूरीश्वरचरणशरणयशोविजयविरचितायां स्तुतिकल्पलतायां तृतीयस्तबके इकागिं
स्वर्गसोपानपदकदम्बमयभाषापार्श्वाष्टकं श्रीमद्विजयनेमिसूरीश्वरप्रसादात्समाप्तम् ॥

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमो नमः ॥

॥ जगद्गुरुः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः ॥

॥ अथ स्तुतिकल्पलतायां चतुर्थस्तबके ॥

स्तम्भनपुरपतिपार्श्वनाथस्तवनप्रारम्भः

॥ श्रीस्तम्भनपार्श्वनाथस्य पञ्चमं स्तोत्रम् ॥



यद्दर्शनं भवगदप्रशमामृतौघं यस्य स्मृतिर्हृदयमोहतमोपहन्त्री॥
वन्दारुकल्पतरुशाखिवरं तमीशं श्रीस्तम्भनाधिपतिपार्श्वमहं स्तवीमि॥ १ ॥
पार्श्वं भवार्तिशमनं तमनन्तबोधं रोधं समग्रदुरितस्य धियः प्रबोधम् ॥
धर्म्योपदेशवचनैरनिशं ददानं भूयो नमामि कृतकर्मकुलावदानम् ॥ २ ॥
धन्योऽस्मि सुन्दरपदामृतमास्रवन्ती यत्कर्णसन्निधिमवाप्य तवोक्तिदेवी ॥
पापापहा विमलबोधविधानदक्षा मातेव यावति कुबुद्धिविपत्प्रसङ्गात् ॥ ३ ॥

धन्योऽस्मि दुःसहविपत्पतितस्य मेऽद्य वाणी त्वदीयचरणस्तुतिरागिणी यत्॥
उक्त्वा सकृत्तव कृपामय नाम लोकः कल्याणराशिमनुविन्दति वागगम्यम् ॥४॥
धन्योऽस्मि मोहतमसान्धदृशोऽपि यस्य बुद्धिस्तव क्रमयुगं यदुपाश्रयन्ती ॥
कल्याणसम्पदमवाप्य भवापवर्गयोग्या चविष्यति कृपावरुणालयेयम् ॥ ५ ॥
धन्योऽस्मि यत्तव पदाम्बुजभक्तिरक्ता इन्दिन्दिरेन्द्ररमणीव पयोजसक्ता ॥
सन्मुक्तिमार्गमकरन्दरसाजितृप्ता मन्ये चविष्यति मतिर्मम नातिदृप्ता ॥६॥
मन्ये कृपायवडवानलतापतप्तादस्मन्मनःसरणितः स्खलितप्रचारा ॥
निर्गत्य गौः समभिवेक्ष्यति पार्श्वनाथचेतः कृपामृतरसौघनितान्तशीतम् ॥७॥
यद्यादुचापलमहं प्रलपामि मोहग्रस्तोऽप्यलङ्घ्यजव एप शिवाय नाथ ॥
तत्रापराध्यति कृपामय तावकीनशान्त्यादिरेव न किमिच्छति मानवोऽयम्॥८॥
चित्रन्त्वतीव मम जाति कृपावतार निष्किञ्चनोऽपि फणिना परिपेवितोऽपि ॥
सर्वोपसर्प्यपदवीम जहासि नाथ श्रीपार्श्वदेव नरकिन्नरवन्द्यपाद ॥ ९ ॥

श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमोनमः

जगद्गुरुः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमोनमः ।

अथ स्तुतिकल्पलतायां तृतीयस्तबके

अकारान्तद्वितीयान्तपदैः श्रीदादापार्श्वनाथस्तवनमारभ्यते ॥

दादापार्श्वाष्टकं तृतीयं स्तोत्रम्

अकारान्तद्वितीयान्तपदैरर्थागौरवैः ॥
स्तोष्ये दादाजिनं पार्श्वं क्लेशप्रशमकारिणम् ॥ १ ॥
कृपावतारं शुभसम्प्रचारं भवाब्धिपारं शिवसौख्यकारम् ॥
कृतोपचारं विबुधैरमारं कुबोधवारं जगदेकसारम् ॥ २ ॥
कृतोपदेशं जगतामधीशं जराद्विषीशं सुखमित्रवेशम् ॥
प्रभासिताशं द्युतिजालकीशं अलोजपाशं कृतशान्तिवेशम् ॥ ३ ॥

छिन्नप्ररोपं कृतकर्मशोषं दयाप्रपोषं हृतबुद्धिदोषम् ॥
यशःप्ररूपं सुखवारिकूपं कृतप्रतोषं शुभमार्गघोषम् ॥ ४ ॥
गतप्रशोकं शुभत्रह्मसेकं चन्द्रप्रजाकं मुक्तमुज्झितात्रम् ॥
त्रिज्ञाणमेकं गतमोहरेकं गतारिजीकं महनीयजाकम् ॥ ५ ॥
श्रवश्यजेदं सकलार्थवेदं विमुक्तखेदं परिबाधनादम्
नगामयोदन्तविजेदिवादं कल्याणकादम्बपयोदनादम् ॥ ६ ॥
भवतृष्णगेहं गुणराशिगेहं धर्मप्ररोहं सततन्निरीहम् ॥
[illegible] कृतिसम्प्रदाहं कृपाप्रवाहं दधतं विदाहम् ॥ ७ ॥
[illegible] गुणतो [illegible] दन्तप्रदेयं परिमुक्तदेयम्
कामानलं [illegible] परिनिन्द्य कायं विमुक्तमायं ह्युपदेशदायम् ॥ ८ ॥
ज्ञानप्रधानं [illegible] लोकत्रयव्यापियशोवितानम् ॥
संखण्डितोपान्त [illegible] पार्श्वजिनं स्तवीमि ॥९॥

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमो नमः ॥

॥ जगद्गुरुः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः ॥

॥ अथ स्तुतिकल्पलतायां चतुर्थस्तबके ॥

स्तम्भनपुरपतिपार्श्वनाथस्तवनप्रारम्भः

॥ श्रीस्तम्भनपार्श्वनाथस्य पञ्चमं स्तोत्रम् ॥



यद्दर्शनं भवगदप्रशमामृतौघं यस्य स्मृतिर्हृदयमोहतमोपहन्त्री॥
वन्दारुकल्पतरुशाखिवरं तमीशं श्रीस्तम्भनाधिपतिपार्श्वमहं स्तवीमि॥ १ ॥
पार्श्वं भवार्त्तिशमनं तमनन्तबोधं रोधं समग्रदुरितस्य धियः प्रबोधम् ॥
धर्म्योपदेशवचनैरनिशं ददानं भूयो नमामि कृतकर्मकुलावदानम् ॥ २ ॥
धन्योऽस्मि सुन्दरपदामृतमास्रवन्ती यत्कर्णसन्निधिमवाप्य तवोक्तिदेवी ॥
पापापहा विमलबोधविधानदक्षा मातेव यावति कुबुद्धिविपत्प्रसङ्गात् ॥ ३ ॥

धन्योऽस्मि दुःसहविपत्पतितस्य मेऽद्य वाणी त्वदीयचरणस्तुतिरागिणी यत् ॥
उक्त्वा सकृत्तव कृपामय नाम लोकः कल्याणराशिमनुविन्दति वागगम्यम् ॥४॥
धन्योऽस्मि मोहतमसान्धदृशोऽपि यस्य बुद्धिस्तव क्रमयुगं यदुपाश्रयन्ती ॥
कल्याणसम्पदमवाप्य भवापवर्गयोग्या भविष्यति कृपावरुणालयेयम् ॥ ५ ॥
धन्योऽस्मि यत्तव पदाम्बुजभक्तिरक्ता इन्दिन्दिरेन्द्ररमणीव पयोजसक्ता ॥
सन्मुक्तिमार्गमकरन्दरसाभितृप्ता मन्ये भविष्यति मतिर्मम नातिदृप्ता ॥ ६॥
मन्ये कषायवडवानलतापतप्तादस्मन्मनःसरणितः स्खलितप्रचारा ॥
निर्गत्य गौः समभिवेक्ष्यति पार्श्वनाथचेतः कृपामृतरसौघनितान्तशीतम् ॥७॥
यद्याद्धुच्चापलमहं प्रलपामि मोहग्रस्तोऽप्यलङ्घ्यभव एष शिवाय नाथ ॥
तत्रापराध्यति कृपामय तावकीनशान्त्यादिरेव न किमिच्छति मानवोऽयम् ॥८॥
चित्रन्त्वतीव मम भाति कृपावतार निष्किञ्चनोऽपि फणिना परिषेवितोऽपि ॥
सर्वोपसर्प्यपदवीश जहासि नाथ श्रीपार्श्वदेव नरकिन्नरवन्द्यपाद ॥ ९ ॥

दग्धोऽस्मि शोकहुतजोजनहृतिजालैरन्तस्थितैर्विगलितप्रतिभोऽतिभीतः ॥
एवंविधस्य कथमीश ममाविरस्तु वाणी तृणीकृतमनोजवदर्प पार्श्व ॥ १० ॥
क्रन्दाम्यथो किमपि देव पुरस्तवेश घोरापदुद्धरणकारण कातरात्मा ॥
कामानलज्वलितमोहवनस्थितम्मां श्रीपार्श्वनाथ विनिवारय मा विलम्बम् ॥११॥
आक्रन्दमार्त्तमवधारय कर्णदेशे कोऽन्योऽस्ति घोरभववारिधिकर्णधारः ॥
त्वत्तोऽनुकम्पितजगत्त्रय पार्श्वनाथ पुण्यौघवर्षणपयोधरदर्शनेह ॥ १२ ॥
अस्मादृशैरशुचिभिः परिकल्पितानि किञ्चाटुचापलवचांसि विनोदयन्ति ॥
चित्तन्तवामरवधूललितेऽप्यनीहैः किं सारमेयलडितानि समाद्रियन्ते ॥ १३ ॥
यद्वा विमूढवचनान्यपि न प्रसादमुत्पादयन्ति किमु ते करुणामृताब्धेः ॥
प्रस्तादरं शिशुवचः किमु नो करोति प्रीतिं पितुर्भुवननाथनतांघ्रिपद्म ॥१४॥
अर्थप्रयाविरहितैरपि मुग्धदीनवाक्यैर्यथा द्रवति मानसमुद्घृणस्य ॥
तद्वन्न सूरिगुणसत्कविवाक्प्रबन्धैः प्रव्यज्यमानरसभावविलासरम्यैः ॥ १५ ॥

पूर्वम्मयाऽशुभमचायि यदीश कर्म त्वत्पादभक्तिरहितेन कुमनाः किमस्मि ॥
यद्वा कृतं सुबहुपुण्यमयं यदान्तः किं दह्यते विपुलशोकधनञ्जयेन ॥ १६ ॥
आराधनान्तव विधाय मनो ममाभूत कुत्रापि जन्मनि दृढानुशयाप्तु देव ॥
सर्वं कृशोज्ज्वलगुणादिपवित्रतुल्यं जातं कथन्त्वपरया मम वन्ध्यमेव ॥ १७ ॥
मानुष्यपोतमधिगम्य चिरेण नाथं सन्तारकं दृढकृपाकरणं भवन्तम् ॥
प्राप्य प्रतीतिरभवन्मम यस्य याद नत्तुं ब्रुडे यदि तदापयशस्तु कस्य ॥ १८ ॥
सेवापरेषु विभवो ह्युपकारकेषु कुर्युः प्रसादमिति नैव विचित्रमत्र ॥
सन्तस्त्वपायमनुजेष्वपि निर्निदानं चेतः कृपामृतभराऽऽर्द्रमुदावहन्ति ॥ १९ ॥
तस्माच्छिरस्तनिखिलोदयसाधनम्मां खिन्नात्मकं विहतभूतमनात्मवश्यम् ॥
सीदन्तमीश्वर कृतान्तभयादभीतिदानेन सत्वरमिहानुगृहाण देव ॥ २० ॥
त्वां नीतिमान् भजति यः स भवत्यनीतिमुक्तस्स येन हृदयात्तु स भवान्न मुक्तः ॥
रक्तस्स तेऽपचितयेऽपचितिन्न धत्ते कृत्स्नार्ति जिन किमुन्नतिमानहन्नो ॥२१॥

स्वापो विद्गमनसो निशि मे डुरापः निर्दाह् श्वास गमयामि कदा सदाहः ॥
त्रायस्व मान्तव घशं जिन शान्तिसिक्त कस्माद्भिन्नोऽस्यपरुपो मयि कर्कशस्त्वम् २२
किं पालनेन सुधियोगतजीतिकस्य पापः शगोऽयमिति मामधिगम्य हातुम् ॥
रक्षार्हसि त्रिभुवनेश यतोस्म्यसाधुर्निष्पुण्यकोहमनुकम्प्यतरोस्मि तस्मात्॥२३॥
स्वीयानिष्ठुरकृतनरैः परिपीडितोऽपि नोपेक्ष्य एव जवता करुणार्णवेन ॥
श्रन्धो पतन्तमपि हसपशुं कृपार्द्रो लोको न नाथ समुपेक्षत एव पुण्यः ॥२४॥
यकप्रचारमिह मां विजहास्यकर्णं पतदाक्षिजिह्मुचितं नच ते कृपालो ॥
यस्माद् भुजङ्गमवरं शिरसा बिजर्षि मनुष्यमेव करुणामृतवारिनाथ ॥ २५॥
पीयूषजानुत इव स्वकसम्प्रपातः स्याद्भास्करादिव तमःप्रजवोपमेव ॥
स्वामिन् कृपाजलनिधेः शरणागतेषु श्रस्मादृशेषु जवतः समुपेक्षणं यत् ॥२६॥
स्वामिन्नजीतिदृदनस्त्वमहं सुजीरुः त्वं बोधिदोहमथ चोधिमतेऽतिष्ठःस्वी ॥

सर्वज्ञ सर्वमवबोधसि भूतजाति भाग्यद्रुयो मम जिनात्रिहिता यदार्त्तिः ॥
ईश त्वया तु करुणावरुणालयेन ज्ञाताथवा पि समुपेक्षित एव ह्यस्मि ॥ २८ ॥
त्वन्त्वेक एव भविनामनिदानबन्धुः स्वाभाविकी तव दया तरणेः प्रभेव ॥
वक्ता पुनर्भ्रियतिरीश ममैव यस्य आक्रन्दनानि वनरोदनसोदराणि ॥ २९ ॥
दौर्भाग्यशेखरमकल्पमपुण्यजाजम् आजन्मनर्मरहितं कटुकोमवाचम् ॥
दिष्टादवाप्य निखिलाधममीश नित्यं मां दुर्गतिः कुलजनीव जहाति नैव ॥३० ॥
त्यक्त्वा समाधिमसमाधिहरं वरन्तु श्रोध्यप्रजाश्पटलं शिवसौख्यशालम् ॥
तेनाश्रमं जलजपत्रविलोलवारितुल्यानि शीघ्रनिधनानि धनानि लब्धुम् ॥ ३१ ॥
आराधिता धनलवान्धितदृष्टयोतिगर्ह्येश्वराः न गुरवो भवबाह्नितारः ॥
घस्त्राणि हानिमधिप प्रगतानि तानि मे हा प्रपीडितमना अधुनास्मि नाथ ॥३२॥
तृष्णा दिवादिवसमवर्द्धत योगिनाथ हेमन्तरात्रिरिव मे हृदये दयेश ॥
नाथ प्रसय मम देह्यवबोधभानु मन्तन्नयान्धतमस कुविपर्ययोत्थम् ॥ ३३ ॥

स्तम्भन्तनोति वितनोति विपर्ययञ्च मोहं प्रपञ्चयति वाक्प्रसरं रुणद्धि ॥
कं नाथ नामयमयं यदुसी करोति दर्पज्वरज्वलनदुःसहसन्निपातः ॥ ३४ ॥
तत्साम्प्रतं जगति विश्रुतहस्तसिद्धिं त्वां पार्श्वदेव सततं विभुमाश्रयामि ॥
तस्माद्विमुच्य वचःप्रसरावरोधं ज्ञागिन्द्रियप्रबलतान्तिमपानुद त्वम् ॥ ३५ ॥
विश्वासमेव च व्रजामि जवेऽप्यगाधे याधे रिपुत्करकृतेऽपि च निद्र्यामि ॥
सामीप्यमेव परिगच्छति कालपाशे जागर्मि नो यदि न रक्षसि किन्नु मे स्यात् ३६
यस्ते यजस्त्वमिह तस्य जयप्रदोसि यस्ते प्रयच्छति त्वं वरदोसि तस्य ॥
एवं त्वमदार्धपर्ययकेलिशीलो किन्नाथ यच्छति नमो न मनो ददासि ॥ ३७ ॥
सर्वेऽपि नाथ जयता परियोधितास्तु पुण्यं गताश्शिवसुखञ्च गतास्त एव ॥
त्वां प्राप्य देव करुणावरुणालयाहन्नो पुण्य एव यदि चेन्ममदुर्विधिस्तत् ॥ ३८॥
केचित्सुखस्य भगवन्नजयस्य केचित् केचित्कृपामयमहोदयमार्गमापुः ॥
नाथे त्वयि स्मृतिपथं सहसागतेऽपि स्तुन्वन्नहं किमु भवामि विहूनचेताः ॥ ३९ ॥

जानामि शान्तिरसपूर्णमनः सरोऽहं न्नोते प्रवेष्टुमरितप्तशरीरकोऽहम् ॥
भर्तुं स्वचेतसि कृपामृतनिर्झरं त्वां शीतातिशीतमपि न प्रजवामि धिङ्माम् ॥ ४०॥
मोहान्धकारविधुरं बहुदुःखतापतप्तं विपाक्रमसमूहहृतं प्रभो माम् ॥
त्वं चेज्जिन त्यजसि को भवतापहारी मे संहरिष्यति परोऽसमवेदनौघम् ॥ ४१ ॥
यस्य स्मृतिर्न च मतिर्न गतिर्न शक्तिरापद्गुजातिपरिपीडितविग्रहस्य ॥
तस्योपधोपतिसमग्रजकेवलं त्वां त्यक्त्वा विधास्यति परो मम कश्चिकित्साम् ॥४२॥
त्वं कष्टहोऽहमपि देव तथैव विश्वं यद्वत्प्रभो शिरसि ते प्रविजाति नागः ॥
तद्वन्ममापि तवसेवन तत्परस्य चित्रं जिनस्त्वमहमस्मि जितो विकारैः ॥ ४३ ॥
यद्वत्स्वधर्मकृशलस्त्वमहं तथैव कामस्त्वयीव मयि नाथ वृथोपजातः ॥
कालस्त्वयीव मयि निष्फलतामवाप चित्रं जिनस्त्वमहमस्मि जितो विकारैः ॥४४ ॥
पापप्रदोऽस्मि भुवनेत्वमिव प्रधानः त्वं नीतिकृज्जिन तथाहमपि प्रसिद्धः ॥
यद्वत्प्रपीडनकरोऽसि तथैव चाहं चित्रं जिनस्त्वमहमस्मि जितो विकारैः ॥ ४५ ॥

[illegible]तनोति वितनोति विपर्ययञ्च मोहं प्रपञ्चयति वाक्प्रसरं रुणद्धि ॥
कं नाथ नामयमयं पटुसी करोति दर्पज्वरज्वलनदुःसहसन्निपातः ॥ ३४ ॥
तस्मादशतं जगति विश्रुतहस्तसिद्धिं त्वां पार्श्वदेव सततं विभुमाश्रयामि ॥
तस्माद्विमुद्य वचःप्रसरावरोधं जागिन्द्रियप्रबलतान्तिमपानुद त्वम् ॥ ३५ ॥
विश्वासमेव च नजामि नयेऽप्यगाधे बाधे रिपुस्करकृतेऽपि च निद्रयामि ॥
सामीप्यमेव परिगच्छति कालपाशे जागर्मि नो यदि न रक्षसि किन्तु मे स्यात् ३६
यस्ते यजस्त्रमिह तस्य जयप्रदोसि यस्ते प्रयच्छति त्वं वरदोसि तस्य ॥
एवं समदर्शिपर्ययकेलिशाली किन्नाथ पश्यति नमो न मनो ददासि ॥ ३७ ॥
सर्वेऽपि नाथ नवता परिपोषितास्तु पुण्यं गतास्शिवसुखञ्च गतास्त एव ॥
त्वां प्राप्य देव करुणाकरुणाप्रपादनतो पुण्य एव यदि चेन्ममदुर्विधिस्तत् ॥ ३८॥
केचित्सुगस्य [illegible] केचित् केचि[illegible]मयमहोदयमार्गमापुः ॥

स्तोत्र
पार्श्व.
॥६१॥

लता.

जानामि शान्तिरसपूर्णमनः सरोऽहं न्नोते प्रवेष्टुमरितप्तशरीरकोऽहम् ॥
धन्तुं स्वचेतसि कृपामृतनिर्झर त्वां शीतातिशीतमपि न प्रभवामि धिङ्माम् ॥ ४०॥
मोहान्धकारविधुरं यदुडुःखतापतप्तं विपद्भिमसमुद्दहनं प्रभो माम् ॥
त्वं चेज्जिन त्यजसि को भवतापहारी मे संहरिष्यति परोऽसमवेदनोघम् ॥ ४१ ॥
यस्य स्मृतिर्न च मतिर्न्न गतिर्न्न शक्तिरापद्गुजालिपरिपीडितविग्रहस्य ॥
नन्योपथोपतिममशरणकेवलं त्वां त्यक्त्वा विधास्यति परो मम काश्चिकित्साम् ॥४२॥
त्वं कण्ठहोऽहमपि देव तथैव विश्वे यद्वत्थजो शिरसि ते प्रविजाति नागः ॥
तद्वन्ममापि तवसेवन तत्परस्य चित्र जिनस्त्वमहमस्मि जितो विकारैः ॥ ४३ ॥
यद्वन्नधर्मकुशलस्त्वमहं तथैव कामस्त्वयीव मयि नाथ वृथोपजातः ॥
कामस्त्वयीव मयि निष्फलतामवाप चित्रजिनस्त्वमहमस्मि जितो विकारैः ॥४४ ॥
पापप्रदोऽस्मि भुवनेत्वमिव प्रधानः त्वं नीतिकृज्जिन तथाहमपि प्रसिद्धः ॥
यद्वत्प्रपीडनकरोऽसि तथैव चाहं चित्र जिनस्त्वमहमस्मि जितो विकारैः ॥४५॥

त्वं चेत्प्रसन्नहृदयः किमु चाटुजालैः त्वं चेदुपेक्षणपरः किमु चाटुजालैः ॥
पुण्योदये सति गुणेषुकृथेव यत्न स्तस्मिन्नसत्यपि गुणेपुकृथैव यत्नः ॥ ५८ ॥
एवं विदन्नुपरमामि न यत्प्रलापाद्दुःखान्मुनीश महिमैष तवैव दृष्टेः ॥
या दन्दशूकमपि दुष्टमपि स्वजावात् सन्त्यक्तवैरपरिशान्तमतिं करोति ॥ ५९ ॥
अप्राप्तधर्मविनवैर्मनुजैरलभ्यं त्वन्नाम देव सकलार्थकरं वदन्ति ॥
तद्धम्मया नदपि दुर्गनिमग्न एव नाथाहमास्मि परिपश्यसि जाग्यदोषम् ॥६० ॥
सत्यं वदन्ति कवयोऽसदुपाश्रयेण गुणयोपि याति सहसा खलु दोषजावत्वम् ॥
या त्वत्स्मृतिः सकलपापतमोपहन्त्री मां प्राप्य साद्य न करोति विपत्प्रणाशम् ॥६१॥
दीनाच्छूतैर करुणान्तव वेदनान्तरुल्लासयत्यनलहेतिमिवेश शिम्वा ॥
आर्तेव सन्दहति तामियमित्यमुत्र किं प्रब्रवीम्यननुरोधमधीश्वरत्वम् ॥ ६० ॥
यन्नाथ पामरनरोचितमभ्यधायि भूयोऽसमञ्जसवचोऽनुचितार्थजातम् ॥
तत्रापि तेऽतिरुचिरा रुचिगीश युक्ता किं कीशचापलमपि प्रजुमोददन्न ॥ ६१ ॥

संसारघोरदवपावकपीड्यमानवाक्कायशान्तिकरणैकमहौषधानि ॥
भोगापवर्गवशकारणकार्मणानि पार्श्वस्य पूजननमस्करणान्यवन्ति ॥ ६८ ॥

त्वत्पादपङ्कजनखस्तुतिवारिधारा ध्यानेन मे मनसि नाथ मुहुः प्रदत्ता ॥
किं कारणं दुरितपङ्ककलङ्कमेषा न क्षालयत्यमरपूज्यपदारविन्द ॥ ६९ ॥
दुष्कालसङ्कटकटाहविजृम्भमानजन्तुव्रजस्य मदवर्त्तिविघट्टितस्य ॥
विश्वत्रयाभ्युदयजन्म वपुस्तवेश एका गतिर्भवति शान्तिविधानदक्षा ॥ ७० ॥
संसारमारवपथप्रथमानतापव्यापद्धतिप्रथितचारुमहीरुहस्य ॥
भोगापवर्गफलदानसमुद्यतस्य पादं श्रयामि तव कामनिदाघतप्तः ॥ ७१ ॥
अम्भोजगर्भसुकुमारतरोपि देव पादस्तवायमतिचित्रचरित्रशाली ॥
यत्पापशैलमनुचिन्तित एव सद्यः प्रस्फोटयत्यसमनन्तदृढं महोच्चम् ॥ ७२ ॥
त्वां त्वं विना त्रिभुवनैकपतिम्परेशम् मर्त्याः कुबोधकुटिलाः शरणप्रहीणाः ॥
पारं प्रयान्ति न च जीतिजरा मुनीश तृष्णातिघोरजलधेः प्रविच्छिन्नमार्गाः ॥ ७३ ॥

त्वन्नाममन्त्रवर एष विनोपचारं सद्यः स्मृतो विषयगागगरापहारी ॥
किञ्च प्रमोहकगणकृपणाऽविचारो मुक्त्यङ्गनावशकरो जयतान्मुनीश ॥ ७४ ॥
तृष्णे हृतासि मदन कुपितो यतस्ते हा मान मानवसमाश्रयणं गतन्ते ॥
यद्भूतले प्रसरति प्रचुरं जिनेशप्रोक्तागमोऽतिवरवचनारिसङ्घहन्ता ॥ ७५ ॥
किं क्रोध दृप्यसि जगद्विनिहन्तुमेव किं चेक्षसे न परिपश्यसि जैनशास्त्रम् ॥
या त्वादृशां शतमपि श्रममन्तरेण हन्तुं प्रभुः प्रसरति क्षितिमण्डले सा ॥ ७६
किं मित्र मन्मथपटप्रजीतजीनस्त्वन्द्रूयसे न परिपश्यसि जैनवक्त्रात् ॥
निर्गत्य तत्त्वविनिवेदनघोरशस्त्रो राजायमेति सहसा ह्युपदेशनामा ॥ ७७ ॥
किं मान मानमुपयासि न पश्यसि त्वं स्याद्वादबोधवरमुद्यतयुक्तिशस्त्रम् ॥
यो जैनवक्त्रशिशिरांशुसुधाप्रपातात्तथ्यं प्रबोध्य विनिहन्ति विपक्षपक्षम् ॥ ७८ ॥
पाखण्डखण्डनविधावशनिप्रकाशा सिद्धान्तदेशनकरी तव नाथ वाणी ॥
जीयात् समस्तजननिनाजनवाक्यजातरूपेण पर्ययवती भुवनत्रयेपि ॥ ७९ ॥

प्राप्तं चिरात् सुकृतराशिवशेन नृत्वं नैव स्थिरं न सुलभं पुनरित्यवैमि ॥
कर्तुं निजस्य हितमीश नत्रापि चेष्टे दैवाहमस्मि करुणामय यन्नविप्यः ॥ ८० ॥
तस्मात् त्वमेव परिरक्ष न यावदेवाऽस्मान्धीवरीव नियतिः स्ववशान् करोति ॥
मत्स्यानिवेश परिजग्धुमियं कराला मोहाभजालपरिवर्त्तननिःशरण्यान् ॥ ८१
क्रूरः समस्तजपरोगदवानलेन पार्श्वं शरण्यमिह विश्वपतिं श्रयामि ॥
संसारमारवपथभ्रमणाभिखिन्नो दीनोद्धृतिप्रविततिप्रभुमथ शान्त्यै ॥ ८२ ॥
नाथ ब्रवीमि पुरतस्तव किं जडोऽहं कामैकघोरवनपावकपीड्यमानः ॥
शान्तिं प्रयामि न च जीवतिविह्वलस्तन्मामुद्धरस्व शरणं प्रतिपद्यमानम् ॥ ८३ ॥
कान्ता न कान्तिजरनिर्जितनन्दनश्रीः सौधाः सुधाधवलिता मणिकुट्टिमा मे ॥
आनन्दनाथ जिन यादृगयं त्वदीयवक्त्रोद्भवो भवहरो वचनप्रकर्षः ॥ ८४ ॥
माकन्द गच्छ भवता न ममास्ति मोदो द्राक्षे नु काथ भवती विरसा सुधापि ॥
पञ्चेन्दुराशिशिशिरांशुसुधापवित्रस्याद्यदानमुदितौ श्रवणौ किमन्यैः ॥ ८५ ॥

येऽन्ये जिन त्वदुपदेशसुधां विहाय संसाररोगजरनाशमिहेहमानाः ॥
अन्यागमेषु विहरन्ति विहाय मन्दास्ते गांगरं समुपयान्ति पयोर्गिनस्तु ॥ ८६ ॥
कालः कदा स भविता करुणापयोधे यत्रान्यवस्तुविमुखस्तव पादमूले ॥
चेतो निवेश्य भवनीतिहरे त्रियुक्तः पापैर्विमुक्तिपदवीं सहसा प्रपद्ये ॥ ८७ ॥
स्वर्गापवर्गपदवी न दवीयसी तं पापो न नापविधये तव मित्र शक्तः ॥
एवं जिनेन्द्रपदमाश्रयसे विहाय सर्वाणि मोहविषयाणि न तेऽस्य दुःखम् ॥८८॥
ज्ञानप्रदीपमतुलं यदि चेन्न देव त्वं चिन्नजिन्ननयसद्ग्रहकारि हृद्यम् ॥
स्याद्वादसंज्ञमकरिष्य इहान्धकारो मोहात्मको न विरतिं सहसाऽगमिष्यत् ॥ ८९ ॥
नित्यद्विचित्रगतिदुर्नयहेतिजालैः सिद्धान्ततत्त्वमुखालोकदयाप्रधान ॥
संवर्म्य युक्तिमयसर्वनयानुगामिस्याद्वादवर्मपटलेन हृढं त्वरक्षः ॥ ९० ॥

क्रिमन्यदथ ते ब्रुवे विदितविश्व दीनस्य मे
स्फुरन्तमतिजीपणं यमभटं प्रलीनस्मृतेः ॥

स्थितिश्चलति पश्यतो गतिरपि स्खलन्ती मुहु
र्धृतिश्च परिवेवते गलति चेतना कायतः ॥ ८१ ॥
जात्यन्धोऽध्वनि सङ्कटे प्रविचलन् दीनः करालम्बनं
हित्वा चेद्विपदं व्रजेद्यदि तदा कोऽस्यापराधो भवेत् ॥
धिग्धिङ्मां बत शास्त्रचक्षुषि सति प्रज्ञाप्रदीपे सति
सन्मार्गप्रतिपादके सति गुरावप्यन्धुपातोन्मुखः ॥ ८२ ॥
त्राता नास्ति पथे तु यत्र विषमे तत्र प्रहारोन्मुखा
द्रष्टारो यदि वर्मिता भवति कस्तत्रातिशक्यक्रियः ॥
यत्र त्वं करुणार्णवस्त्रिभुवनत्राणप्रवीणः प्रभुः
कामाद्याः प्रहरन्ति मां यदि तदा कस्यैष गर्हावहः ॥ ८३ ॥
यावद्दर्पविसर्पग्रामकरणस्तोमाभिरामाकृति
स्तावन्मोहतमोभरेण न मया गर्तः समालोकितः ॥

आसन्ने पतने प्रभो त्वदपरं कम्प्रार्थये कं प्रभो
आत्मद्रोहपरायणं करुणया त्रायस्व मां त्वच्छरण् ॥ ८४ ॥
बाल्यं मोहहतेन मूढचरितैर्नीतं मुधा यौवनम्
वित्तोपार्जनयाव्रजनपदक्षितिव्यैर्ष्ण्यं व्यतीतम्मम ॥
स्वामिन्नद्य जराकुलस्य नयतुर्यायानलार्तस्य च
मृत्युर्धावति यावदेव न विभो माम्पाहि तावद्भुतम् ॥८५॥
नाथ त्वच्चरणाम्बुजन्नहि मया सम्यक्समाराधितम्
संसारार्णवक्षालनप्रवहणं धर्मार्जनन्नो कृतम् ॥
स्वर्गद्वारकपाटमुद्घटयितुं नोपायमासादयम्
कीदृक् स्यां परजन्मनीति सततं चिन्ता समुज्जृम्भते ॥ ८६ ॥
परमपुरुष न स्मृतो मया त्वं यदिह नयामि विपद्यलीनवृत्तिः ॥
भवजलनिधिपोतमंघ्रियुग्मं तव स्मरणमवाप्य नयामि सुखदुःखः ॥८७॥

कदा नाथ ध्यानामृतरसहृद्धास्वादसुहितः ॥
समुत्सृज्य क्रूराहितजयमविक्षिप्तहृदयः ॥
असारं संसारं तृणमिव विचिन्त्य क्वयि सुखम्
प्रसादात्ते भूयासमिह करुणाम्भोऽधिप विभो ॥ ९८ ॥
विनापुण्यन्नाथ त्वदुदितवचोभक्तिरतुला
न लोकानान्त्यक्त्वा तव वचनभक्तिं जिन न तत् ॥
इति प्राप्तेऽन्योन्याश्रयविषमदोषव्यतिकरे
भवानेको वेत्ता भवति परिहारेऽत्र शरणम् ॥ ९९ ॥
संसारापारवाराम्बुधितरिचरणः पापसङ्घातशैल-
ध्वंसप्रौढोपदेशाशनिरमरगणक्लृप्तपूजोपचारः ॥
कारुण्याम्भःप्रवाहैः कृतसकलमनोदुःखजम्बालनाशो-
भूयो दृष्टिप्रपातैः सुखयतु जनतां स्तम्भनः पार्श्वनाथः ॥ १०० ॥

॥ कविनामगर्भश्रकल्पः ॥

यस्यातुल्यचरित्रकस्य महिमा निश्शेषसातोदयः
शोकं हन्ति च यस्य सर्वमनिशं दृष्टिः सुधाजित्वरी ॥
विघ्नं हन्ति च संस्मृतिःसुमनसां पूज्यस्य यस्यानिशम्
जन्मार्त्ति प्रणिहन्तु सोऽयममलः पार्श्वोमम स्तम्भनः ॥ १०१ ॥

॥ अथ श्रीमुनिनामगर्भो बीजगर्भकल्पः ॥

यस्तम्भनयत्यघव्रातं यज्जनं तु विश्रुतम् ॥
यन्नमनं मुदे स्यात् यत्नात्पार्श्वं स्तवीमि तम् ॥ १०२ ॥

भव्यान्तःकरणप्रचारचतुरैकान्तोक्तिरात्युत्थिता-
भ्रान्तज्ञानविरोधिविभ्रमतमोनिर्मूलनैकक्रियः ॥
स्याद्वादोक्तिसहस्रपादघटनानेकान्तपद्मासमो-
ल्लासःपार्श्वपरो नवो विजयते श्रीसिद्धसेनो रविः ॥ १०३ ॥

कदा नाथ ध्यानामृतरसदृढास्वादसुहितः
समुत्सृज्य क्रूराहितजयमविक्लिष्टहृदयः ॥
असारं संसारं तृणमिव विचिन्त्य क्वापि सुखम्
प्रसादात्ते भूयासमिह करुणाम्भोऽधिप विभो ॥ ९७ ॥
विनापुण्यन्नाथ त्वदुदितवचोभक्तिरतुला
न लोकानान्त्यक्त्वा तव वचनभक्तिं जिन न तत् ॥
इति प्राप्तेऽन्योन्याश्रयविषमदोषव्यतिकरे
भवानेको वक्ता भवति परिहारेऽत्र शरणम् ॥ ९९ ॥
संसारापारवाराम्बुधितरिचरणः पापसङ्घातशैल-
ध्वंसप्रौढोपदेशाशनिरमरगणक्लृप्तपूजोपचारः ॥
कारुण्याम्भःप्रवाहैः कृतसकलमनोदुःखजम्बालनाशो-
भूयो दृष्टिप्रपातैः सुखयतु जनतां सज्जनः पार्श्वनाथः ॥ १०० ॥

॥ कन्नियामगच्छीयकल्पः ॥

यस्यातुल्यचरित्रकस्य महिमा निश्शेषसातोदयः
शोकं हन्ति च यस्य सर्वमनिशं दृष्टिः सुधाजित्वरी ॥
विघ्नं हन्ति च संस्मृतिःसुमनसां पूज्यस्य यस्यानिशम्
जन्मार्त्ति प्रणिहन्तु सोऽयममलः पार्श्वोमम स्तम्भनः ॥ १०१ ॥

॥ अथ श्रीस्तुत्यनामगच्छीय श्रीजपुरमकल्पः ॥

यस्तम्भयत्यघव्रातं यन्मज्जनं तु विश्रुतम् ॥
यन्नमनं मुदे स्यात्तं यत्लालपार्श्वं स्तवीमि तम् ॥ १०२ ॥
भव्यान्तःकरणप्रचारचतुरैकान्तोक्तिरात्र्युत्थिता-
भ्रान्तज्ञानविरोधिविभ्रमतमोनिर्मूलनैकक्रियः ॥
स्याद्वादोक्तिसहस्रपादघटनानेकान्तपद्मासमो-
ल्लासःपार्श्वपरो नवो विजयते श्रीसिद्धसेनो रविः ॥ १०३ ॥

येन स्तम्भनपार्श्वसंस्तुतिलतादिव्यौषधी निर्मिता
न्यारमत्राणकरी महोग्रकुरुजामाजीवतोऽथो भुवाम् ॥
मन्तस्तः प्रकटीकृता जगवतो मूर्त्तिस्सुमूर्त्तिस्तया
श्रीमान् सोऽजयदेवसूरिरवतान्नित्यं सतां संस्तुतः ॥ १०४ ॥
नव्यव्याकरणाम्बुधेर्यदुदयः संवर्द्धकः सोऽनिशम्
वादीशोकुसहस्रजोपशमिता वागंशुजालैर्नवः ॥
जव्यान्तः कुमुदप्रमोदकुशलस्तैस्तैश्चरित्रांशुजि-
र्जीयात् पार्श्वपदाम्बुजैकशरणः श्रीहेमचन्द्रः शशी ॥ १०५ ॥
स्फीतं यस्य निरन्तरं हृदि महत् पार्श्वोक्तिनिष्ठास्पदे
साम्राज्यं किमपीह नूतनमखं वाग्देवताऽकण्टकम् ॥
कृत्वात्यन्तसमुन्नतिकृतवती नाद्यापि वासम्परम्
तादृक् प्रासवती यशोविजय इत्याख्यो गणी सोऽवतात् ॥१०६॥

श्रोत्रन्यस्तवचैव शुरूक्तणितिः पीयूषपूरैस्समा
येषामस्ति सदा चमत्कृतिकरी ते पार्श्वनक्ता भुवि ॥
तत्त्वानष्टविवेचनैकचतुराश्चारूक्तिसन्धादरा
धीरास्सरूपणाधनाः कविवरा विश्वेऽतिजिग्युर्नरम् ॥ १०७ ॥
नव्यस्तोत्रसुपोत्रऽर्पितमनोज्ञमीमक्ताम्योक्तयो
येषान्ते खसरीतिपीनिदमनाः कीर्त्तिश्रिया सञ्जिताः ॥
उन्निद्रोक्तिरसाञ्चितामरचना धन्याः क्षमामण्डनाः
श्रीपार्श्वैकपरायणास्समजयन् स्वातुल्यशक्तिश्रियः ॥ १०८ ॥
विद्वद्वृन्दमनः प्रबोधदिवसे श्रीनेमिसूरीश्वरे
साम्राज्यं चर्जातप्रभूतकरुणे विद्याविलासास्पदे ॥
तच्छिष्येण यशोऽनिधानमुनिना स्वसूत्रेयमानन्ददा
भूयाद्भव्यजनस्य जैनचरणाम्भोजेऽर्पिता संस्तुतिः ॥ १०९ ॥

श्रीपार्श्वस्य जणन्ति संस्तुतिमिमां ये जक्तितो जूतले
ते श्रीपुण्यसुरद्रुमाश्शमदमध्यानादिशाखाश्रिताः ॥
कर्मात्यन्तविमोक्षमिष्टफलसम्प्राप्तप्रकर्षानराः
सिद्धस्थानमुपागतास्सुखरसास्वादैकमग्नाशयाः ॥ ११० ॥
श्रीपार्श्वस्तवनिर्मितिश्रमसुखैकान्तारमजानूद्या-
त्यन्ताश्लेपविकाशितासममनोराजीवपुष्पार्चितः ॥
आनन्दारमफलैकजूमिरमितानन्तप्रतापो मया
सोऽस्तु स्तम्जनपार्श्वनाथशरणःश्रीनेमिसूरीश्वरः ॥ १११ ॥

इति श्रीनानातीर्थसंरक्षणजनितनानातीर्थोद्धारनिरवद्यगुणगणानिन्दितगुणगणाल्पीयस्यशिप्रानिम्नगामिन्युरगः
पुष्कलोज्ज्वलशिशिरितदशदिशां निगमशब्दगगनचरनानानुगामिसमकृताहर्निशचिन्तनप्रगिरागां
विशालवरभवनिन्द्राविनिद्रवादिविनोदविवादोपद्रवनिर्वाणशुद्धगर्भमनवरतविरोधरनकम्प्रमुनिदिनकरकराणां श्रीमद्वि-
जयनेमिसूरीश्वराणां पादपद्मेन्दिन्दिरायमाणेन विजयविनेयेनाणुस्तुतिकल्पलतायां

चतुर्थस्तवके

स्तम्भनपुरपतिपार्श्वनाथस्तवनं षष्ठं

पूज्यपादागमविज्ञानां श्रीमद्विजयनेमिसूरीश्वराणाङ्कृपाशाटीपुटाशीःप्रभावात्

समाप्तम्.

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमो नमः ॥

॥ भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः ॥

अथ स्तुतिकल्पलतायां चतुर्थस्तवके

श्रीगौडीपुरपतिपार्श्वनाथस्तवनप्रारम्भः

॥ श्री गौडीपार्श्वनाथस्य सप्तमं स्तोत्रम् ॥

लोकालोकप्रसारोद्भवजवनलयाक्रान्तकान्तार्थपुञ्जा-
नेकान्तत्वप्रबोधाङ्कुरजननपटुस्फीतवाग्बीजहेतुम् ॥
स्तोष्ये सेन्द्रामरालिग्रथितमधुरिमोद्गारवाग्दोपमुक्ता-
मुक्तार्थस्तोत्रसार्थानुगतगुणगणं पार्श्वगौडीशमासम् ॥ १ ॥
वाचा निर्मलया सुधामधुरया शिक्षाक्रमप्राप्तया
शुद्धान्तःकरणेन शुद्धवपुषा मूर्ध्नावनम्रेण च ॥
भक्त्या पापशिलाशनिप्रतिमया स्तोत्रैःपवित्रैस्तथा
श्रीगौडीपतिपार्श्वनाथमनिशं मुक्तिश्रियेऽहं स्तुवे ॥ २ ॥
कीलाज्जित्रिभुवनं प्रताप्य सहसा कामानलो जृम्भते
मोहाद्यैर्ग्रसितुं जगन्ति बहुधा रूपाणि धत्ते मुहुः ॥
किङ्कर्तव्यमिहेति यावदिति मे चिन्ता समुन्मीलति
तावत्सर्वविपक्षवारणकरी गौडीशजप्तिः श्रुता ॥ ३ ॥

तन्नेत्रं वदनं तदेव चरणौ तावेव हस्तौ च नो
यत्त्वद्वक्त्रनिरीक्षणेन भवतस्तुल्या कृतार्थं भवेत् ॥
पार्श्वं त्वत्प्रतिबिम्बदर्शनकृते कण्डूयमानो च यो
यो त्वत्स्तोत्रसुमाञ्जलीविरचनाबद्धादरो सर्वदा ॥ ४ ॥
त्वामिन्दुप्रतिमद्विजावलिविनास्फीतोपदेशामृता-
सेकोज्जीवितधर्मकल्पलतिकं ये नाश्रयन्ते जनाः ॥
मूढा श्वापदुदन्वतः कथमहो पारं गमिष्यन्ति ते
घोरं मोहविषन्निपीय हृदयप्रोद्दामदाहातुराः ॥ ५ ॥
माविज्ञान मुपास्व मा च बहुधा घोरन्तपः सञ्चिनु
कष्टं मा बहुतीर्थपर्यटनतः स्वात्मानमायासय ॥
किन्त्वेकं सकलापदुद्धृतिकरं गौडीशपार्श्वप्रभोः
पादाम्भोजयुगं विचिन्तय सकृत् सर्वं सत्वे प्राप्स्यसि ॥ ६ ॥
यस्य ध्यानपरायणे जिनजने तिष्ठन्ति षड्शत्रवो

नो याधिमुखास्तदा परिणतास्तैर्नेति किम्ब्रूमहे ॥
नित्यानन्दघने सुधर्मविपिनेऽजस्रं रमन्ते जना
स्तं वृन्दारकवृन्दवन्दितपदं गौडीशपार्श्वं स्तुवे ॥ ७ ॥
त्वत्सौदर्यनिरूपणेषु निपुणे नेत्रे मम स्ताम्प्रभो
श्रोत्रे स्तां श्रवणानुरागरसिके युष्मद्गुणाकर्णने ॥
त्वद्ध्यानामृतसिन्धुमज्जनरतिश्चेतश्चमत्कारिणी
श्री पार्श्वार्चनचातुरीचरणगोरास्तां च ते हस्तयोः ॥ ८ ॥
यच्छिल्पं समुपासते सुमनसस्तुन्वन्ति दिव्यस्तवैः
कुर्वन्त्यर्चनकर्म नन्दनवनोद्भूतप्रसूनैरपि ॥
ध्यानव्यापृतिपूरितेन मनसा पश्यन्ति यं योगिन
स्तं गौडीश्वरपार्श्वदेवमनिशं वन्दे विमुक्तिश्रिये ॥ ९ ॥
मनोतु मम मानसं सकलसारशून्यं जगत्

डुनोतु न रिपुव्रजः प्रशमसेकगुरूं मनः ॥
तनोतु मम मङ्गलं सकलकर्ममर्मोच्छिदः
करोतु मम चेतसि प्रबलशान्तिसौख्यं जिनः ॥ १० ॥
भवेदनुपमा मतिर्निखिलतत्त्वविद्योतिका
रुचिर्ज्जवति तत्त्वतस्त्वदुपदर्शिते सत्पथे ॥
किमन्यदिह ते ध्रुवे शुभमयञ्जगज्जायते
प्रमोचन विलोचने तव कृपास्पदे देहिनाम् ॥ ११ ॥
अमन्दमणिमण्डलीविमलहेमसिंहासने
स्थितन्तव वपुः स्फुटं स्फुटितहाटकश्रीहरम् ॥
समस्तसुरसंहिते सुरपतौ स्तुते सुन्दरम् ॥
त्रिलोककुशलं मम प्रणिकरोतु पुण्योदयम् ॥ १२ ॥
अपारपरितापकृज्ज्वतपातपान्धा वयम्

प्रपामिव सुशीतलां तव कृपामुपासीमहि ॥
यया समवदेशिता श्रयति तां सदा सम्पदा
दयामृतविवर्षिणीं मयि जिनेन्द्र दृष्टिं कुरु ॥ १३ ॥
सुजनजनतोदधेः समदिनेषु संवर्द्धके
सदैव सकलाकले द्विविधपक्षसत्पक्षके ॥
प्रतिक्षणसुलक्षणेऽस्खलितलक्ष्मणालक्षिते
तवास्यनवचन्द्रे मम मनश्चकोरायताम् ॥ १४ ॥
समस्तजनमोददा जलजसर्वगर्वच्छिदा ॥
ज्वलज्ज्वलनजित्वरज्वरजरत्वरात्तञ्जिकाः ॥
जगत्त्रयरञ्जिकास्त्रिविधदुःखवल्लभञ्जिका
दिशन्तु मम काङ्क्षितन्तव दृशः सुधासोदराः॥ १५ ॥

अघव्रातोद्भूतप्रबलतरदुःखानलजर-
प्रदग्धान्तर्वृत्तेर्गतगुणततेर्जन्यजविनः ॥
असारे संसारे भवति शरणं यस्य चरणम्
स्तुवे पार्श्वं गौडीपुरपतिमहन्तं प्रतिदिनम् ॥ १९ ॥
अबुद्धिर्मन्दात्मा शमदमदयाद्यैर्विरहितो
गुणौर्नित्यं पार्श्वस्तवनविमुखस्तेऽन्यजनुषि ॥
तथापि त्वम्बाले मयि जिन कृपां चेत्तु तनुषे
मदन्यो धन्यः को भुवि दिवि तदानन्यशरणे ॥ २० ॥
त्रिलोकीसंराजे समवसरणे स्वर्णरचिते
यथौचित्यं स्थाने निविशति गणे सद्विविपताम् ॥
सुखश्रेण्या वाण्या शिवसुखमनन्तं दिशति यः
स मे पार्श्वो दद्यात् स्मृतिपथमुपेतः शमसुखम् ॥ २१ ॥

तपोभिः किं किन्तैरसमसमयाभ्यासकलितैः
क्रियाणां कष्टैः किं किमिति विरसाहार करणैः ॥
विवेकैरेकैः किं किममरसुखैर्दुःखकलितै-
स्तवैकम्मे भूयाच्चरणमिह शश्वत्तु शरणम् ॥ २२ ॥
जगन्मायामूढं भवभयविभीतं समवितु-
न्त्वदन्यो धन्यः को भवति भुवने पूर्णविभवः ॥
त्वमेवातस्त्रातस्त्रिभुवनपते मामपि परम्
सदादक्षो रक्षोद्धतभयमनीशन्त्वशरणम् ॥ २३ ॥
अनाथानान्नाथो गतिरगतिकानाञ्जिनपते
अबन्धूनाम्बन्धुर्मतिरमतिकानां शुभमते ॥
असातानां सातन्त्वमसि च गुणो निर्गुणनृणाम्
अविद्यानां विद्या त्वमसि च धनं निर्धननृणाम् ॥ २४ ॥

भवानेकोबन्धुर्भवति च भवानेव पितरौ
भवानेको भ्राता भवति च भवानेव सुगुरुः ॥
भवानेको देवो भवति च भवानेव भवनम्
भवानेको धर्मो निधिरपि भवानेव भुवने ॥ २५ ॥

विविधधनसुसाध्यं वस्तुजातञ्जनानाम्
नहि निजपरितृप्ते प्रेक्षसे भक्तिभाजाम् ॥
इति धननिरपेक्षोऽप्यर्थयुक्तैरमीभि-
रुचिरवचनपुष्पैरर्चनन्ते तनोमि ॥ २६ ॥

श्लथयति भवबन्धान् जन्मजालप्रबद्धान्
स्मृतिरनुभवभाजां यस्य चित्तोपनद्धा ॥
अनुपमसुखसिद्धिर्यत्प्रसादात्स एको
जयति जगति गौडीपार्श्वनाथो जिनेन्द्रः ॥ २७ ॥

मुखसितकरमध्ये दीप्यमानप्रकाशम्
विकसितमनिशन्तल्लीनताराद्विरेफम् ॥
कमलकुमुदधर्माद्वैतसाम्राज्यराजम्
दिशतु मम शिवन्ते नेत्रपद्मं नवीनम् ॥ २८ ॥

दिनकरकरयोगायोगतोऽमुक्तशोभम्
नयनयुगलचन्द्राह्लैतमैत्रीप्रबोधम् ॥
कचनिकरतमोन्तर्दीप्यमाननवीनम्
जयतु तव मुखाब्जं दत्तहर्षप्रकर्षम् ॥ २९ ॥

त्रिविधजनसुवाञ्छापूरणे पारिजातम्
निजशरणमुपेतुरक्षणेष्वाशु दक्षम् ॥
जगजरजवकूपोद्धारणे रज्जुमेकम्
त्रिभुवनजनवन्द्यं हस्तयुग्मं स्तवीमि ॥ ३० ॥

नखनिकरनिशेशज्योतिरुद्योतिताशम्
त्रिभुवनजनपुञ्जक्लान्तिसाड्डंर्डरृष्टया ॥
तदमपिमृडुरक्तं यस्य नित्यन्तदीज्यम्
सविनयमथ वन्दे पादयुग्मन्तवेश ॥ ३१ ॥
प्रतिपक्षमिह मानन्त्वायुषो नाशमेति
शिथिलयति जरान्ते मन्दिरञ्चेन्द्रियाणाम् ॥
इति यत शतकृत्वश्चिन्तयित्वा त्वरस्व
भज भज परभक्त्या मित्र गौडीशपार्श्वम् ॥ ३२ ॥
जयति जयति गौडीपार्श्वनाथो जिनेन्द्रो
जयति जयति विम्बन्तस्य देवस्य नित्यम् ॥
जयति जयति धन्यस्सोऽपि भक्तस्तयोर्यः
इह जगति किमन्यद्धन्यमात्रवर्णनीयम् ॥ ३३ ॥

प्रोद्यत्कर्मानिलोघप्रबलतरङ्गुरावेगसद्यो निरोधे
स्थूलाङ्गोथन् प्रकृत्या जगति निजजनान् सान्त्वयन् शान्तिवृष्ट्या ॥
सर्वत्रापातरम्ये विषयसुखरसे दापयन् प्रीतिरीतिम्
नित्यस्यायादपायात्पुरुषपरफलप्रापक पार्श्वनाथः ॥ ३४ ॥
त्वं चित्त ब्रूहि सत्यं मधुरमधुदधिस्वच्छपानीयदुग्ध-
द्राक्षापीयूषपानं कृतमिह बहुधा कर्मबन्धप्रसादात् ॥
कर्म्मोच्छेदैकहेतोः कथय मधुरिमा यस्त्वयासौऽशमात्रं-
गौडीशस्य स्तुतौ स भ्रमणरसिक किन्दृष्टपूर्वोऽपि तेषु ॥ ३५ ॥
देवाद्गौडीशनाथञ्जवरदनपटो स्वीयवृत्त्योपलब्धम्
किञ्चिच्छङ्कं यथेष्टं स्मृतिपथमनिशञ्च करोष्यङ्ग चित्त ॥
क्रोधाद्यास्त्वाममित्रं निजविमुखतया चेद्विजानीयुरेते
कुर्युः किन्त्वान्तदा नो जिनपतिविमुखं स्वीयदुष्टप्रचारैः ॥ ३६ ॥

॥ अथ कविनामगर्भश्चक्रबन्धः ॥

यस्सच्चैकहितः सतां वितनुते पार्श्वस्स सौख्योदयम्
शोभां भास्करसोदरां सुतनुते भव्याब्जकोशोच्छिदि ॥
विज्ञानप्रविदानपण्डितवरो रागोरुनागोद्धरि
र्जन्मार्त्तिप्रविभेदकोऽप्यतनुको निर्वेदको रक्षतु ॥ ३७ ॥



॥ अथ स्तुत्यनामगर्भो बीजपुरमबन्धः ॥

यस्य गौः पाति संसारम् यस्योड्डीनं यशो वरम्
यस्यशक्ति रवेशाश्म यत्नात्सोऽस्तु श्रिये परम् ॥ ३८ ॥
श्रीगौडीपतिपार्श्वसंस्तुतिमिमां गायन्ति शृण्वन्ति ये
ते पार्श्वैकपरायणा भुविनरास्त्राणप्रवीणावराः ॥
आर्त्तिं शल्यनिभामिहृत्य सकलां शान्तिश्रियालिङ्गिताः
स्यातिनिश्चितमश्नुवन्ति भुवने सिद्धिश्च ते विन्दते ॥ ३९ ॥

श्रीमन्नेमीश्वरगुरुवरोऽङ्घ्रिपादप्रसादा-
देवं गौडीपुरपतिवरस्संस्तुतःपार्श्वनाथः ॥
मोहध्वान्तप्रमथनपटुः पण्डितः पुण्यदाने
दोषप्लोषं विकिरतु सतां सत्यमार्गप्रदाता ॥ ४० ॥
मायामोहतमोविमोहितदृशामाशापिपासाकुल-
स्वान्तानां परितो गवेषितशमानन्दामृतानामृणाम् ॥
श्रीनेमीश्वरसूरिराज्यसमये पार्श्वस्तुतिस्संस्तुता
भूयाच्छान्तिकरी प्रपूर्णमनसां नित्यन्तु पार्श्वस्तुतो ॥ ४१ ॥
गौडीशस्तुतितो न किञ्चिदपरं याचे फलं लौकिकं
नोवाऽलौकिकमिष्टदेव जवतः किन्त्वेकमेवास्तु मे ॥
तत्त्वातत्त्वविवेचनेफचतुरस्यात्यन्तिकन्नावतः
श्रीनेमीश्वरसद्गुरो श्शमनिधेरानन्दपूर्णम्मनः ॥ ४२ ॥

इतिश्री दुर्द्दलितसकलदुरितोद्वेगदुर्व्वेगसरिरयोऽपारपूरविभोपभीष्मग्रीष्मायमाणसंसारमारवपथमथमाना-
नलकुविकल्पोद्गच्छदतुच्छदुःखदावानलप्रशमनैकधाराधरायमाणसंसप्पत्सपत्नपद्धर्गदर्प्पज्वरभरावि-
दारणागदङ्कारायमाणजिनवरचरणस्मरणप्रसादसन्दर्भनिर्भरगभीरगीर्भ्रमन्मन्थक्ष्मा भृ
ध्द्युमधुमितसिन्धुप्रतिभटायमान-
श्रीमद्विजयनेमिसूरीश्वराणां चरणचञ्चरीकायमाणविनेययशोविजयविरचितायां स्तुतिकल्पतायां
चतुर्थस्तवके

श्री गौडीपुरपतिपार्श्वनाथस्तवनं सप्तमं

पूज्यपादारविन्दानां गुरुवराणां श्रीमद्विजयनेमिसूरीश्वराणाम्प्रसादात् समाप्तम् ॥

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमः ॥

॥ भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः ॥

अथ स्तुतिकल्पलतायां पञ्चमस्तवके

पादिबन्धाख्येन चित्रकाव्यभेदेन श्रीपार्श्वस्य स्तवनं प्रारभ्यते

॥ श्री पार्श्वनाथस्य अष्टमं स्तोत्रम् ॥



पुण्यपुञ्जपरिपूरितैः परैः पूरुषैः प्रपरिपूजितः परम् ॥
पापपुञ्जपरिपेषणे पटुः पावनः परमपूरुषः परः ॥ १ ॥

पूज्यपादपरमप्रियः प्रभुः प्रेमपाशपरिपन्थिपेषणः ॥
पद्मपङ्क्तिपरिपेशलः परम् पीडितप्लवपिपः प्रपालयः ॥ २ ॥

पादपांशुपवित्ता प्रतिश्रयः प्राणिनां प्रशमपेटकप्रदः ॥
पार्थिवप्रणतपादपद्मकः प्रार्थितप्रदपारिजातकः ॥ ३ ॥

पातु पापपटलात् परिग्रहं प्रत्यजन् परिहरन् प्रपीडनम् ॥
प्राणिनां प्रमदपूरणः पतिः पारगः प्रजनपायसः प्रभुः ॥ ४ ॥

प्राणिनां प्रियपदप्ररोपकः पारिजातपरताप्रणोदकः ॥
पूज्यपङ्क्तिपरिपूजितः प्रियः पार्श्वपारगतपूरुषः परः ॥ ५ ॥

॥ पञ्चभिः कुलकम् ॥

पार्श्वनाथपदपङ्कजं परं प्राणिनां परपथप्रकाशकम् ॥
पावनं परमपूरुषप्रियं पातु पापपटलप्रमोचकम् ॥ ६ ॥
पिष्टपेषणपटुत्वपूरितः पेषयेत् प्रथमतः प्रपिष्टकम् ॥
पूर्वदेवपुरहूतपार्थिवैः पूजितं प्रभुपदं प्रपूजये ॥ ७ ॥
पूज्यः पण्डितपर्षदां परपथप्राज्ञासकः पालकः
पीयूषप्रविपातपावनपदः पूर्णप्रज्ञः प्राणिनाम् ॥
पाद्यैः पूजितपादकः परपथः प्राप्तप्रकर्षः प्रभुः
पार्श्वः पातु परप्रतापरमः पापात् परं प्राणिनाम् ॥ ८ ॥

॥ अथ कविनामगर्भश्लोकः ॥

यस्मात्प्रापुरशेषशोककलहक्रोधव्रजा अत्ययं
शोजाजासितजूघनप्रकलितो विश्वप्रपूज्यो मुनिः ॥
विज्ञैर्वन्दितपूज्यपादकमलः पार्श्वः सतां शङ्करः
जन्तुक्षेमकरो वरस्सकनकाजासः श्रिये स्तान्मम ॥९॥
सर्वैऽस्त्वर्वकुगर्वपर्वरहिताः श्लाघ्याः प्रियं प्राणिनाम्
सर्वदर्पहरं परं शिवकरं सारं सदा सादरम् ॥
श्रीपार्श्वस्य नवप्रबन्धनरा नकत्या नयच्छेदनं
कण्ठाग्रे कलयन्तु कौतुककरं कौटिल्यकृन्ता इदम् ॥ १० ॥
दिप्रबन्धकलिता वचनावलीयं पार्श्वस्य पादकमले भ्रमरावलीव
यात् सदा सुखमधुकरणा निविष्टा स्वाराधनैकनिपुणस्य बुधस्य चित्ते ॥११॥

इति श्रीचितरपाण्डित्यताण्डवताण्डवितकीर्त्तिकौमोदीकश्रीमद्विजयनेमिसूरीश्वरपादपद्मनिर्यन्मकरन्दबिन्दु-
तुन्दिलचित्तभ्रमरयशोविजयविरचितायां स्तुतिकल्पलतायां पंचमस्तवके पादिपदकदम्बमय-
पार्श्वाष्टकमष्टमं स्तोत्रं समाप्तम् ॥

———ఃఃఃఃఃః———

॥ श्री चतुर्विंशतिजिनेश्वरेभ्यो नमः ॥

भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः

अथ स्तुतिकल्पलतायां पञ्चमस्तवके

निर्दन्त्यबन्धाख्येन चित्रकाव्यभेदेन श्रीपार्श्वस्य स्तवनं प्रारभ्यते

॥ श्री पार्श्वेश्वरस्य नवमं स्तोत्रम् ॥

श्रीपार्श्वं प्रणमामि पापहरणं मायाविघट्टं परम्
गाम्भीर्येऽपरमर्णवं प्रभुमहं गीर्वाणपूज्यक्रमम् ॥

कुर्वाणं जडजातचूर्णकवरं चञ्चूर्यमाणागमम् ॥ १ ॥
आचारेशमहं कृपापरिणमज्जीवोपकारक्षमैः
वाक्यैः पापघटाविघट्टकमहावेगप्रजावाकरैः
जीवेपूरुगुणप्रवाहचयमाचक्षाणमिष्टं जुषि
विश्वव्यापियशोजरं च महये श्रीपार्श्वमीड्यं प्रभुम् ॥ २ ॥
गीर्वाणेशकिरीटकोटिकपणाचेक्रीयमाणारुणं
विश्वश्रेष्ठगुणं क्रमप्रजवकं वित्राणमाढ्यं रुचा ॥
श्रीशङ्खेश्वरमण्डकं जविजनप्रेमैकगेहं परं
श्रीयोगीश्वरशाकभूपरिवृढैः पूज्यं महर्षिं श्रये ॥ ३ ॥
विश्वेऽपारजवार्णवप्रवहण श्रीगूकवारीश्वर
विश्वे मोहमहीरुहोरुपरशो रोपाचरे शम्बक ॥
प्रौढश्रीगुणराजिपङ्कजगणेऽवश्यायराशिं विजो



मायाम्मे हर विज्ञ पूरुपवर प्राणप्रियेश प्रभो ॥ ४ ॥
श्रीमोहापहरं परं प्रभुमहं पुण्येशमीशं श्रियाम्
वाग्पीयूषविवर्षकं परशिवप्रापं परं प्राणिनाम् ॥
श्रीमारप्रविणाशमेव वपुषा श्रीहाटकश्रीहरं
ईडे पार्श्वविभुं च पूरुपवरं श्रीपूरुपेडघश्रियम् ॥ ५ ॥
श्रीकाम्यं शशिजाजमीशममरैः पूज्यक्रमाम्भोरुहं
कार्याकार्यविवेचकागमवरं पुण्यप्रवाहार्णवम् ॥
गेयं मेघगभीरघोषमपरं भव्याम्बुजाहर्मणिं
श्री पार्श्वं प्रणमामि भीजरहरं वाचंयमेशं परम् ॥ ६ ॥
मां मायापरिमोहरोहजनकं कम्प्रं रुजारौरवैः
कष्टव्यूहविशारणैकपटुकश्रेयोजरभ्राजक ॥
वामामवजपङ्कशोषकरणप्रोढार्कविम्बोपम
प्रज्ञापाटवमीश यच्छ परमब्रह्मैकरूप प्रभो ॥ ७ ॥

ज्ञेयाज्ञेयविवेचकं प्रभुमहं पाद्यप्रपूज्यं परं
विश्राणं गुणराजिगौरववरं क्षीणाष्टकर्मव्रजम् ॥
श्रीपार्श्वं परिबृंहणं शमयमश्रेण्याश्च त्राण्याश्रयैः
ईडे विश्वविजुं विवेकिशरणं कर्मव्रजास्फोटकम् ॥ [redacted] ॥
श्रीनेमीश्वरसूरिराज्यसमये प्रौढप्रभावाकरे
तेषां पूर्णपरप्रसादमहिमाव्राजिष्णुनाजिष्णुना
तच्छिष्येण नुतो यशोविजय इत्याख्यावृता साधुना
निर्दन्त्यार्णपदैः स्तुतः प्रभुरिति श्रेयोविधत्तात् सताम् ॥९॥
॥ अथ कविनामगर्भचक्रबन्धः ॥
यस्मान्मोहमहीरुहोरुपरशोः सञ्जायतेऽपात्ययः
शौर्यौघेण सुशोभितश्च परितः पापौघशैलाशनिः
विद्यावैजयवर्द्धकः प्रपवनः पार्श्वः श्रियां दायकः
जन्माद्यार्तिमिमां प्रजित्य परमं स्थानं विधत्तान्मम ॥ १० ॥

निर्दन्त्याणपदप्रबन्धपरमानन्दप्रदानोद्यतां
पार्श्वाशेषगुणैकरत्नरचनाचित्रीकृतान्तर्मतिम् ॥
श्रीपार्श्वस्य पठन्तु संस्तुतिमिमां भव्याम्बुजाहःप्रभां
निःशेषव्यसनौघनाशनकृते मात्सर्यमुक्ता बुधाः ॥ ११ ॥

इति श्री[illegible]कुलिशायमाननिःशेष
देशमुखीमस्तम्भसंरक्षकाजिनशासनस्थापकाचार्यवर्याचार्यवर्यश्रीमद्विजयनेमिसूरीश्वरपादपद्मेन्दिन्दि-
रायमाणविनेयपद्मविजयविरचितायां

स्तुतिकल्पलतायां पञ्चमस्तबके
निर्दन्त्याक्षरमयपार्श्वाष्टकं नवमं स्तोत्रं समाप्तम्

———

॥ श्री चतुर्विंशतिजिनेभ्यो नमः ॥

भगवद्भ्यः श्रीमद्विजयनेमिसूरिभ्यो नमो नमः

अथ स्तुतिकल्पलतायां षष्ठं स्तबके

शरणागतोद्धरणाख्यं स्तोत्रं प्रारभ्यते

॥ श्री पार्श्वेश्वरस्य दशमं स्तोत्रम् ॥

भवभ्रमजनितदिग्भ्रमसततमानससंभ्रमं
विगतचेतनमसमचेतनगुणनिकेतन पार्श्व माम् ॥
विशदशारदकुमुदबान्धववदन मन्दिरमापदां
सदयमुद्धर जिन यशोऽन्निधमशरणं शरणागतम् ॥ १ ॥
दुरितभेदन त्रिविधवेदनमसमखेदनबापदं
मदनमर्दन मदविमर्दनः दुरिततर्दन निर्दयम् ॥

खसङ्गपासन विततशासन विततवासनमानसं
सदयमुद्धर जिन यशोऽजिधमशरणं शरणागतम् ॥ २ ॥
भुवनभूषण विविधदूषण कुमतिसंहृतिपूषणं
भुवनपावन विगतभावनविषयधावनलोलुभम् ॥
भयविभञ्जन भविकरञ्जन वरनिरञ्जनपूजन
सदयमुद्धर जिन यशोऽजिधमशरणं शरणागतम् ॥ ३ ॥
भविकबोधक विषयरोधक विगतबाधकचित्तकं
समयबोधन सकलशोधन विविधबाधनसाधनम् ॥
भवविमोचन विगतशोचन विमललोचन चञ्चलं
सदयमुद्धर जिन यशोऽजिधमशरणं शरणागतम् ॥ ४ ॥
गुणसमुद्र महत्वमुद्र विनिद्रसम्पदमुद्रण
सकलसज्जनजननतारणचरणचारणकारण ॥

असमसंवर जविजनम्बर विजितशम्बरशातन
सदयमुद्धर जिन यशोऽविधमशरणं शरणागतम् ॥ ५ ॥
ज्वलदनर्गलजवदवानलविकलकल्मषजाजनं
कपटकौशलकलितपाकलफलितकर्म्मविपाककम् ॥
ललितलालसलालितलाघवदलितबोधबलोदयं
सदयमुद्धर जिन यशोऽविधमशरणं शरणागतम् ॥ ६ ॥
गुणविवर्जितविबुधतर्जितशमविसर्जितमानसं
जयहुताशनशमितशासनमसदुपासनलालसम् ॥
कुगतिसङ्गतिलसदसन्मतिसततसङ्गतिवर्जितं
सदयमुद्धर जिन यशोऽविधमशरणं शरणागतम् ॥ ७ ॥
अरिपटचरहठविलुण्ठितचटुलचेतनविद्रुतं
मतिविवर्जितचिरतरार्जितनियतितार्जितसत्क्रियम् ॥

कृतकराञ्जलिमधद्वाधलित्रिकलितालसचेतसं
सदयमुद्धर जिन यशोऽज्ञिधमशरणं शरणागतम् ॥ ८ ॥

इति श्रीसकलजिनसंबन्धकल्पकोल्लासकारककुलकल्पद्रुमकल्पविघटनमकरकर्कशलकुलिशायमानानिःशेष-शेमुषीमुन्मेषपराजितापरापराजितनिर्जराचार्यवर्याचार्यवर्यश्रीमद्विजयनेमिसूरीश्वरपादपद्मेन्दिन्दि-रायमाणविनेययशोविजयविरचितायां
स्तुतिकल्पलतायां षष्ठस्तबके
शरणागतोद्धरणाख्यं दशमं स्तोत्रं समाप्तम्

॥ श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमः ॥
॥ भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमो नमः ॥
अथ स्तुतिकल्पलतायां षष्ठस्तबके
श्री पार्श्वस्य स्तुतिफलप्रशंसास्तोत्रं प्रारभ्यते ॥

॥ श्री पार्श्वनाथस्य एकादशं स्तोत्रम् ॥



ते सर्वदैव भुवने न न शोचयन्ति क्लेशापदं सपदि ते प्रविमोचयन्ति ॥
तान् वैरिणोऽपि वचने नं न वञ्चयन्ति ये त्वां सुपुष्परचनैररमर्चयन्ति ॥१॥
ते कर्मरज्जुनिगडं त्वतिखण्डयन्ति मूर्खैर्विदग्धसमितिं सुधिमण्डयन्ति ॥
ते वैरिचक्रमपि चात्र न चण्डयन्ति ये त्वत्स्तवेन दुरितन्त्वनितुण्डयन्ति ॥२॥
विघ्नव्रजं सततमेव निवारयन्ति बुद्ध्या त एव सदसञ्च विचारयन्ति ॥
आपत्ततिं जिनवर प्रविदारयन्ति त्वद्भक्तिमेव हृदि ये प्रविधारयन्ति ॥३॥
ते सिद्धिसौधगमने परितूरयन्ति संसारघोरविपिनं परिचूरयन्ति ॥
ते लोकमित्रनिवहं परिपूरयन्ति ये त्वस्तवजरं परिपूरयन्ति ॥४॥
पापप्रवाहमिह ते परिपीडयन्ति पुण्यव्रजं प्रतिदिनं परिकीडयन्ति ॥
कामाममार्गमनिशं परिमीलयन्ति ये त्वत्स्तवजरैः परिशीलयन्ति ॥५॥

ये नून सुधर्मवचनैर्भुवि पावयन्ति मायाञ्जनाञ्च विकटां परिज्ञापयन्ति ॥
ते त्वां जनानपि कदापि न द्रावयन्ति ये त्वां सुधारसमयं हृदि नावयन्ति॥६॥
ये लोकलोकवचनैः परितूपयन्ति ध्यानामृतं मुनिगणाः परितृप्यन्ति ॥
सज्ज्ञानदानमनिशं परिपूरयन्ति ये त्वं मनस्तव नवैः परिजूपयन्ति ॥ ७ ॥
ते पापपुञ्जमनिशं परिशोषयन्ति क्रूरान् विरोधिजनतानपि तोषयन्ति ॥
पारिजातकन्दमतुलं परिपोषयन्ति त्वां पार्श्व पार्श्व इति ये परिघोषयन्ति ॥८॥
ते ज्ञानदानमनिशं प्रविदापयन्ति शान्तिं त एव हृदये स्वधिवासयन्ति ॥
दुष्कर्मकर्दममलं प्रविद्रावयन्ति ये भक्तिनस्तव मनः प्रविकासयन्ति ॥ ९ ॥
ते दुःखाग्नि रागदमनजैरिव निर्वापयन्ति
स्वीयानेहःक्षणमपि वृथा नैव ते यापयन्ति
संसारमालामनयमनिशं सर्वतो द्रावयन्ति
ये [illegible] सद्वृत्ते [illegible] ॥ १० ॥

ते भव्यानां भवनमहोदन्वतस्तारयन्ति
स्वं शान्ताधैः सकलसुरसेवार्पितं पारयन्ति ॥
विद्याव्यान्तर्भवकुविषयान् सर्वदोत्सारयन्ति
ये त्वत्स्तुत्या स्वहृदमनिशं भक्तितः पारयन्ति ॥ ११ ॥
तेऽङ्घ्रिप्रायानपि रिपुगणान् स्थानतश्चालयन्ति
स्फीतं गीतं त्वतिशययशःपूरमास्फालयन्ति ॥
अंहःपङ्कं सततमिलितं स्वात्मनः क्षालयन्ति
त्वद्भक्तौ ये सततमलसं चित्तमुत्तालयन्ति ॥ १२ ॥
ते रागादीनतिरयरिपून् सर्वतो ध्वंसयन्ति
स्वान्तं शान्तं दमयमगुणैः सर्वदोत्तंसयन्ति ॥
कर्मव्रातांश्चिरतरचितानाशु विस्रंसयन्ति
ये त्वत्पादानजिनवचनैः सर्वदा शंसयन्ति ॥ १३ ॥

ते सत्सूक्तिप्रवरवचनैर्वादिनस्त्रासयन्ति
शादिग्रस्तान् सदसि विमुग्धान् सर्वदाश्वासयन्ति
साधुस्वान्ताब्जवनमनिशं सर्वथोल्लासयन्ति ॥
ये स्वकीर्त्याः कलुषहरणीः सर्वतः कासयन्ति ॥ १४ ॥
ते भव्यानां जननपततां सद्वृतं ग्राहयन्ति
शोकाकीर्णाननिजयनरान्नित्यमुत्साहयन्ति ॥
दीपारण्यं तृणमिव तपस्तेजसा दाहयन्ति
ये स्वक्तिप्रगुणहृदयं कर्म निर्वाहयन्ति ॥ १५ ॥
ते पापौघं तमिव परध्यानतस्तक्षयन्ति
साम्यमानान्वितनगहनान् बुद्धितो ग्राहयन्ति ॥
सत्पथं शुभकमजरं निर्जरं जह्यन्ति
॥ १६ ॥

इति [illegible]

[illegible]

[illegible]

नाम्नां मुनिकल्याणानां लघुतरं श्रीपार्श्वस्य मुनिकल्याणकं·

स्तोत्रमेकादशं समाप्तम् ॥



॥ श्रीचतुर्विंशतिजिनेभ्यो नमो नमः ॥

॥ श्रीमद्विजयनेमिसूरिभ्यो नमो नमः ॥

अथ स्तुतिकल्पलतायां विविधनामगर्भच्छन्दोमयमुक्तक-

महावीरस्वामिषट्त्रिंशिका प्रारभ्यते ॥

अथ स्तोष्ये वीरनाथं वानन्दितगुरुक्रमः ।
न्दोभिर्विविधैः कैश्चिन् मुग्धलोकप्रबोधकैः ॥ १ ॥

संख्याँस्तव वक्तुमीशो मुखैः सहस्रैरपि नोरगेशः ॥
पबुद्धिर्मनुजो ब्रवीतु तथापि भक्त्या मुखरीकृतोऽहम् ॥२॥

अथैकाक्षरपादमुक्तायां श्रीवृत्तम्

श ॥ स्याघम् ॥ ३ ॥

न ॥ गुणेन ॥ १ ॥ उदाहरणिका यथा- ऽ

अथ त्र्यक्षरपादं मध्यायां मृगीवृत्तम्

नोऽजनार्द्यीमृगी ॥ त्वां विना याति शम् ॥ ४ ॥

अथ त्र्यक्षरपादं मध्यायां नारीवृत्तम्

शोकास्ते यान्तीश ॥ ध्यातारो मानारीम् ॥ ५ ॥

अथाष्टाक्षरपादमनुष्टुभि समानिकावृत्तम्

धीरते समानिका च सोऽष्टकाक्षनादिकेषु ॥

दृष्टिरास दुःखहार शान्तये ममास्तु साथ ॥ ६ ॥

अथाष्टाक्षरपादमनुष्टुभि विद्युन्मालावृत्तम्

॥ १ ॥ यत्र रः स एव ॥ मा मनामृगी ॥ २ ॥ उद्वणिका यथा॰ ऽ । ऽ
॥ ३ ॥ एतौ मध्यमागी ॥ ३ ॥ छन्दोऽयः मा ध्याता ॥ उद्वणिका यथा॰ ऽ ऽ ऽ
॥ ४ ॥ गुरुरेव गोऽसमाति अन्यतो गुरुर्भवेत् ॥ व्यान्निरा समानिकेह कीर्तिता गुणाग्रगण्य ॥ ४ ॥
॥ ५ ॥ उद्वणिका यथा ॥ ऽ । ऽ । ऽ । ऽ ।

विद्युन्मालानाशां लक्ष्मीं देवेच्छन्ति त्वद्भयाशून्या ॥
नो ते मर्त्या मोहं वीर मायामोहे सक्ता यान्ति ॥ ७ ॥

अथाष्टाक्षरपादमनुष्टुभि चित्रपदा वृत्तम्

चित्रपदा तव वाणी शान्तिसुखाय ममास्तु ॥
श्रावजनाः कविलोका यामनिशन्तु नुवन्ति ॥ ८ ॥

अथ नवाक्षरपादं बृहत्यां भुजगशिशुसृतावृत्तम्

नरजिनवर नम्रा ये न जनि किल तेषान्तु ॥

(७)॥ विद्वांसः व्याकरणार्थैः मौ यत्र व्याख्या दीर्घाः ॥ अष्टौ वर्णाः सा शोभाढ्या विशेषा विद्युन्माला ॥७॥
॥ ७ ॥ उदाहरणमत्र यथा ॥ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ॥
(८) ॥ भा भगणेन विरता येन पुनः भविपदा ॥ भद्रगणे रमणीया चित्रपदा कथिता सा ॥ ८ ॥
॥ ८ ॥ उदाहरणमत्र यथा ॥ ऽ ॥ ऽ ॥ ऽ ऽ ॥

शामसुखदद जीत्यै सा भुजंगशिशुभृता भूमिः ॥ ९ ॥

अथ दशाक्षरपादं पङ्क्त्यां मत्तावृत्तम् ॥

मर्त्या लोका तत्र न नजन्ति पादाम्भोजं विपयमसारम् ॥
मन्वाना ये शुजफलहेतुं ते यान्तीशासुखमिह भूयः ॥ १० ॥

अथैकादशाक्षरपादं त्रिष्टुभि स्वागतावृत्तम्

नाथ ते पदसरोजमिलिन्दा ये जना भुविवरा विजयास्ते ॥
लब्धपुण्यजरदेव सुरेभ्यः स्वागतानि सुरपूज्य लभन्ते ॥ ११ ॥

अथैकादशाक्षरपादं त्रिष्टुभि इन्द्रवज्राच्छन्दः

॥ ७ ॥ नगणयुगलमथो भगणविततसौन्दर्या ॥ कविकुलकथिता त्वेषा भुजगशिशुभृता ज्ञेया ॥ ७ ॥
॥ ७ ॥ उद्धरणिका यथा ॥ ।।।।।। ऽ ऽ ऽ ॥

॥ ८ ॥ यस्यां पूर्वं मगणविन्यासः पश्चात्तस्माद्भगणनिबन्धः ॥ मध्ये सेव मनिगदिता सा विश्रैमत्ता गुरुचितान्त्या ॥ ८ ॥
॥ ८ ॥ उद्धरणिका यथा ॥ ऽ ऽ ऽ ऽ।। ।।ऽ ऽ ॥

स्तौतीश्वरं वीरविभुं जनोऽय देवेन्द्रपूज्यक्रमपद्मरागम् ॥
यो मानवस्तस्य तु पुण्यजाओ नो इन्द्रत्वंमादपि जीतिरस्ति ॥ १२ ॥

अथ द्वादशाक्षरपादं जगत्यां वंशस्थवृत्तम्

सदा सुवंशस्थजनैर्जनोत्तमैः प्रपूज्यपादाब्जयुगं मुनीश्वरम् ॥
सदा महावीरजिनं जिनेश्वरं स्तवीमि जक्तिप्रसरद्वचोभरैः ॥१३॥

अथ द्वादशाक्षरपादं जगत्यां प्रियंवदावृत्तम्

॥९॥ वर्णितैर [illegible] स्यागतेति मधुगक्षरवक्ता ॥ गण नेन गुभगा भगणेन सा गुरुद्वयमनोहरवन्था ॥९॥
॥ ९ ॥ ह्रस्वाणिका यथा ॥ S । S । । । S ॥ S S ॥
॥ १० ॥ आदौ मधुम्येन विराजमाना मध्ये जकारेण विभूषिता या ॥
अन्ते गकारद्वयमण्डिता सा स्यादिन्द्रवज्रा विबुधप्रसिद्धा ॥ १० ॥
॥ १० ॥ ह्रस्वाणिका यथा ॥ SS । SS ॥ S । SS ॥
॥ ११ ॥ गणो जगंत्रः सविभासते पुरस्तदनन्तरा च पश्चतो भवेत् ॥ ततोऽजवरगे रगणश्च भासते वदन्ति वंशस्थमिदं महामते ॥११॥ ह्रस्वाणिका यथा ॥ । । S । S S । । S । S । S ॥

शिवसुखप्रदविजो प्रियंवदादिविपदो मधुररावकाक्षिताः ॥
अथ जजान्ति नमहर्निशमरं जजति यस्तव पदाम्बुजवरम् ॥ १४ ॥

अथ द्वादशाक्षरपादं जगत्यां प्रमिताक्षरावृत्तम्

प्रमिताक्षरान्तव वचोलहरीं वहुजल्पितो हृदयतोपकरीम् ॥
वहुलप्रवोधकरवाक्यवरां प्रजजामि तां जवजयापहराम् ॥ १५ ॥

अथ द्वादशाक्षरपादं जगत्यां प्रभावृत्तम् ॥

श्रुतिपतिशतजासमानश्रुते मुनिवर जवचीप्रविध्वंसक ॥

॥ १७ ॥ प्रथममेव नगणेन सयुता भवति येन विरता सुधीमता । जगणगश्रितनियन्धशोभिता रगणवद्धभा प्रियंवदा ॥ उदाहरणिका यथा ॥ । । । ऽ ॥ । ऽ । ऽ । ऽ ॥

॥ १२ ॥ प्रथमं भवेन् सगणन्प्रयुता जगणाश्रिता सगुरुणेन युता ॥
श्रुति कस्य नेव मुग्वदाभिमता प्रमिताक्षरा बुधगणप्रथिता ॥ १९ ॥
उदाहरणिका यथा ॥ ॥ ऽ । ऽ । ॥ ऽ ॥ऽ ॥

जिनवर तव सा प्रशस्तप्रभो॰मम शमसुखदाऽस्तु वीतस्पृह ॥ १६ ॥

अथ द्वादशाक्षरपादं जगत्यां कुसुमविचित्रावृत्तम्

कुसुमैर्विचित्रां तव जिन पूजां विदधति लोका निरुपमभक्त्या ॥
अमरवरा ये पदयुगलस्य विदधति सेवां शिवकर तेषाम् ॥ १७ ॥

अथ त्रयोदशाक्षरपादमतिजगत्यां मतिरुचिरावृत्तम्

नखानिशन्तु सुरवरप्रपूजितोत्तमक्रमप्रविलसदच्छकान्तिका ॥
सुखाय मेऽस्त्वतिरुचिरा नखावली भवोदधिप्रवरतरिर्जिनेश्वर ॥ १८ ॥

॥ १४ ॥ भवति नगणसंयुता नन या पुनरपि विबुधप्रिया मण्डिता ॥ रगणविराजिता सभाह्लादिका स्यात्तुरगविश्रामिन्द्रियाभिधा ॥ १४ ॥ उच्चारणिका यथा ॥ । । । । । । ऽ । ऽ ऽ । ऽ ॥
॥ १५ ॥ नगणविनद्धा यगणविनद्धा पुनरपि या स्यान्नगणयुक्ताम्या ॥ यगणविनद्धान्तिकपदरम्या बुधगदिता सा कुसुमविचित्रा ॥१५॥ उच्चारणिका यथा ॥ । । । । ऽ ऽ । । । । ऽ ऽ ॥
॥ १६ ॥ भवेद्युगे जगणयुता ततः पुनर्भता चतुर्थेऽपि भगणेन मण्डिता ॥ ततो भवेत् सजगुरुराजिता वरा चतुर्भिरतिर्ग्रथिता मतीर्भिता ॥ उच्चारणिका यथा ॥ ।ऽ। ऽ।। ।।ऽ। ऽ । ऽ ॥

अथ त्रयोदशाक्षरपादमतिजगत्यां मृगेन्द्रमुखवृत्तम्

प्रकुपितमप्यथ भूतले कदापि जयति मृगेन्द्रमुखं न नीनिदानं ॥
नय चरणाम्बुजनम्रकिन्चितासमशमधामशरीरिणां यतीन्द्र ॥ १९ ॥

अथ चतुर्दशाक्षरपादं शक्वर्यां सिंहोन्नतावृत्तम् (वसन्ततिलका)

नृणां क्षुधोन्नतशरीरविनाविनाशां क्रोधोन्नतद्विपवरस्य विघातने सा ॥
सिंहोन्नता भवति यस्य शरीरकान्तिः सिद्धार्थनन्दनजिनः ससुखाय मेऽस्तु॥२०॥

अथ चतुर्दशाक्षरपादं शक्वर्यां लोलावृत्तम्

॥१७॥ नगणद्वितयमितगुरुभागकं यत्र । भवति मतो जगणश्च श्च गोगः ॥ पुनरपि जन गरण मण्डितं
यत्र । मगुरु मृगेन्द्रमुखं पूर्वविंशत्यम् ॥

॥ १७ ॥ उदाहरणम् यथा ॥ । । । । S । । S । S । S S ॥

॥ १८ ॥ संयुक्तभगौ जसगणा मुनिकाव्यपेन सिंहोद्धतेति कथिता मुनिभिर्नवेन ॥ उद्धर्षिणीति गदिता
मधुमाधवीति नागैर्वसन्ततिलका मरुत्प्रसिद्धा ॥

॥ १८ ॥ उदाहरणम् यथा ॥ S S । S । । । S ॥ S । S S ॥

मत्तेभ कुरुम्,

नत्वा यौवनलक्ष्मीर्निमुक्तिभ्रमणोऽसौ शिवाश्रयं चरित्रः श्रीवीरोऽतिदुरापः ॥
अपूर्वं भवभारं संसारोदधितारं विश्वेशं भजत द्राग् श्रीवीरं जिननागम् ॥ २१ ॥

अथ पञ्चदशाक्षरपादमतिशक्वर्यां मालिनीवृत्तम्

ननमयययुतेयं मालिनी भोगिलोकैः ...पृथुदयनवोर्म्मीमालिनीह भ्रमन्तः
भवति च शरणं यो वीरनाथं विनाऽन्यः इति विदधतु लोका वीरसेवां सुखालीम् ॥२२॥

अथ पञ्चदशाक्षरपादमतिशक्वर्यां कामक्रीडावृत्तम्

॥ १० ॥ पूर्वं यस्य निरुत्तमध्यानतो विनियोग्यः । ...तस्मात् भव्य निर्वेदः ॥ अन्ये ...वर्ण्या विपुलान्तरा । द्विः ... श्रेया विरमता सा ॥
॥ १० ॥ उदाहरणं यथा ॥ S S S ॥ S S S S S ॥ S S ॥

॥ ११ ॥ ननमयययुता येन ... पतगगणमण्डला ... ॥ [redacted] भवति न केषां हारि-
... मालिनी नागराजैः ॥

११ । उदाहरणं यथा ॥ । ॥ । । । SSS ।SS ।SS ॥

वृ. क.
स्ता.

कामक्रीडांमुक्तं शुद्धात्मानं देवैर्वन्द्यन्तं सौम्याकारं शुद्धज्ञानं लोकानन्दं नाथञ्च ॥
धीरं धीरं दोषोन्मुक्तं शश्वच्छान्तं सर्वज्ञम् ईशं लोकत्रातारं दीनोद्धारं नत्वा स्तौमि ॥२३॥

अथ षोडशाक्षरपादमष्टयां गरुडरुतवृत्तम्

सततमहं जिनेश्वरवरं नयज्ञायक
सकलजयानलोदकसमं सुनामेप्सदम् ॥
तव परमं नजामि भुवनैकबन्धो जिनो
गरुडरुतं महादितुजगेन्द्रमन्त्रासने ॥ २४ ॥

अथ षोडशाक्षरपादमष्टयां चकितावृत्तम्

२१ ॥ भीत्यर्थ्यं कनिन्याशः मातृभ्यां मृत्यवर्णां । यां मागधी वृष्णयेन मातृविंशः कनिन्या ॥
शापमीरामिता भ्याता भ्रांतिविभिन्नाग्रन्थे । मर्गाणिरमालिरगांशया तन्यान्तनों मोहं हने ॥
॥ २१ ॥ गुरुलघुवृत्त यथा ॥ ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ॥
॥२२॥ भवति पूर्णं नर्मशरणाणां नर्मशरण्यनः । भगण इतः पर्ं नगणगोभिनः स्यात्तथा ॥ भवति
नगणगंशरणाणां गुरुण्यनः पर्ं । गरुडरुतं यदा पतति मात्रया मनोहरम् ॥
॥ २२ ॥ गुरुलघुवृत्त यथा ॥ ।।। ।ऽ। ऽ।। ।ऽ। ऽऽ। ऽ ॥

जीमजवनश्रेणीभ्रान्तिक्श्रान्तिसुचकितौ-
जव्यवरजरा दारिद्र्यप्रोद्भूतमहद्रुदः ॥
इच्छथ खलु चेद्गन्तुं मोहाब्धेरपरतटम्
गच्छत शरणं श्रीवीरं जीताजयददनम् ॥ २५ ॥

अथ षोडशाक्षरपादमष्टयां चित्रवृत्तम्

चित्रचित्तवृत्तयो विबाधयन्ति दुःखजेद
मां विभो न विश्वमेतदेव देव सारमस्ति ॥

॥ २३ ॥ भाभिगण एव स्यात् पूर्वं साभिगणतः । यत्र भवति रम्यत्वं तस्मात् स्याद्यदि मगणः ।
नस्य च रचना तस्मात् तस्माद्यदि नगगः । गा पाइ गाइता सेयं भाई स्तहिनु चलिता ॥
॥ २३ ॥ उदवणिका यथा ॥ S ॥ ॥S SSS SS । ॥। S ॥
॥ २४ ॥ यत्र राभियोगणः पुरस्ततो जगंयकोऽथ । राभिधेन मण्डितो गणेन जस्ततः पुनस्तु ॥
वर्णितो रसंज्ञको गणश्च ल्यान्तिमं वृषेन । चित्रसंज्ञमीरितं वृषभमोददायकत्वम् ॥
॥ २४ ॥ उदवणिका यथा ॥ S । S । S । S । S । S । S । S । ॥

त्वत्पदाब्जनखिरस्तु चित्तधाम्नि यस्तुतस्तु
नान्यदत्र भूतले श्रयामि सारवस्तु नाथ ॥ २५ ॥

अथ सप्तदशाक्षरपादमत्यष्ट्यां हरिणीवृत्तम्

तव पदयुगं ज्ञानोद्रेकप्रदायि भजन्ति ये
भवति तृणवत् संसारोयं जिनेन्द्र महात्मनाम् ॥
चकितहरिणीनेत्रावामभ्रुवश्च मनोहरा-
नहि न च धनं तेषां लोभाय वीतरजोहृदाम् ॥ २७ ॥

अथ सप्तदशाक्षरपादमत्यष्ट्यां पृथ्वीवृत्तम्

॥२८॥ नगणस्सगणः [illegible] [illegible] पुनः । [illegible] [illegible] लघुः ॥ गुरु-
[illegible] [illegible] [illegible] [illegible] । भवति [illegible] हरिणी तदा ॥
॥ २८ ॥ उदाहरणं यथा ॥ । । । ॥ ऽ ऽ ऽ ऽ ऽ । । ॥ ऽ । ऽ ॥
॥ २९ ॥ जगणसगणः पुनर्भवति [illegible] गणः । जगणसगणः पुनर्भवति [illegible] ॥
यगणरगणान्विता [illegible] । [illegible] तु पृथ्वी तदा ॥
॥ २९ ॥ उदाहरणं यथा ॥ । ऽ । ॥ ऽ । ऽ । ॥ ऽ । ऽ ऽ । ऽ ॥

महामहिमजासुरार्चितसमस्तपृथ्वीश्वरैः
सुदेशनवचोऽमृतैर्जनितचन्द्रमोन्यकृतिः ॥

विलोचनविजाजितातिचलखञ्जरीटप्रजा
मनोहरति कस्य नो तव मुखप्रजा सामला ॥ २८ ॥

अथाष्टादशाक्षरपादं धृत्यां शार्दूलललितवृत्तम्

चित्रन्मोहमृगादिदर्पदलने शार्दूलखेलितम्
कुर्वँल्लोकहृदब्जबोधमनिशं त्वद्वाक्यनिकरः ॥
उद्यद्भास्करवत् सुरासुरनराऽभिस्तव्यचरण
जीयादेव महोपकारचतुरो ज्ञाक्षासमरसः ॥ २९ ॥

॥२९॥ मायिगणः प्रथमं गणस्सगणसम्भ्राजी यदि ततः। जाव्ययस्स्यात्र गणस्ततस्सगणसंराजी परमितः ॥ ताग्व्यश्चैनदनन्तरं सगणसम्बन्धो भवति चेत् । तर्हिशैः भणितं दिवाकररसैः शार्दूलललितम् ॥ ॥ २७ ॥ उदाहरणिका यथा ॥ ऽ ऽ ऽ ॥ ऽ । ऽ । ॥ ऽ ऽ ऽ । । । ऽ ॥

अथाष्टादशाक्षरपादं धृत्यां चित्रलेखावृत्तम्

ऐन्द्रश्रेणीनतपदयुगला भव्यपापौघजेत्री
कल्याणालीव्रततिविततिर्वार्द्धयमाणा मुनीनाम् ॥
स्वान्तागारे वसतिमुपगता शान्तिधारां क्षरन्ती
ते भूतिम्मे भवतु शिवकरी चित्रलेखा मनोज्ञा ॥ ३० ॥

अथैकोनविंशत्यक्षरपादमतिधृत्यां मेघविस्फूर्जितावृत्तम्

श्रयन्ति त्वां देवं गतभवरुजं भक्तिभावोत्तरङ्गाः
सदामूर्च्छन्मोहे भजतमसि ये सूर्यभासायमानम् ॥

॥ १८ ॥ मोभौ नय त्रियगणसहितैश्चित्रलेखा तदा स्यात्

॥ १८ ॥ उदाहरण यथा । SSS भा । । । ISS ISS ISS ॥

दन्ते तेषां चीक्षवमपि च नो स्वप्नकालेऽपि नाथ
मृगारातीत्राद्याः प्रतिजयतमा मेघविस्फूर्जितास्तु ॥ ३१ ॥

अथैकोनविंशत्यक्षरपादमतिधृत्यां फुल्लदामवृत्तम्

ये नित्यं श्रीमज्जिनवरनृपजं फुल्लदामप्रकाण्डैः
भक्त्यार्चन्तीशं विगतजयजरं तीर्थनाथं तु वीरम् ॥
तेऽर्च्यन्तेजव्याः सुरवरततिभिः पूर्णकामा अकामाः
स्तुत्वा स्तूयन्ते सुरनरनृपजै र्यान्ति मोक्षश्च शश्वत् ॥३२॥

॥ २९ ॥ गणो यात्पः पूर्वं मगणरचना स्यात्परस्तान्मनोज्ञा । भवेन्नाख्यो ह्यो गण [redacted] ततो यस्यवन्धो मनोज्ञः ॥ रौ स्यातां तस्माद्गुरुरिह यदा तर्हि मान्या मुनीन्द्रैः रसैः षड्भिर्योर्यैतिरिह मता मेघविस्फूर्जितासौ ॥

॥ २९ ॥ उदाहरणस्य यथा— ।SS SSS, ।।S S।S S।S S ॥

॥ ३० ॥ स्यान्मात्रयः पूर्वं नगण इहततो नेन ह्यः परस्तात् । तस्मात् साष्यश्चेत् रमणयुवलितो रेण नर्द्धं पुनश्च ॥ तस्माद्रो यस्मिन् विबुधजनगणैः संविनं सद्गणाढ्यं ज्ञेयं मासैस्तच्छरहयतुरगैः फुल्लदामाभिरामम् ॥

॥ ३० ॥ उदाहरणस्य यथा ॥ SSS SS। ।।। ।।S S।S S।S [redacted] ॥

॥ अथ त्रिंशदक्षरपादं कृत्यां गीतिकावृत्तम् ॥

यदुलानुरागसुरासुरार्चितपादपङ्कजमादरात्
परिषेवते जिनशस्तवामलजंक्तितो जगतीतले ॥
गुणशंसिनी किल तस्य देव नरेन्द्रवक्त्रविनिर्गता
भुवनत्रयेऽपि विलासमेति जनस्य नाथ सुगीतिका ॥ ३२ ॥

॥ अथैकत्रिंशदक्षरपादं प्रकृत्यां स्रग्धरावृत्तम् ॥

कैलासोद्दामकान्तिस्फुरदमलतलन्यस्तचित्रोपलाढ्ये

॥ ११ ॥ मनजान्विता भगमाश्रिता न्यभृगिता ननु गीतिका ॥
अन्यत्राप्युक्तम्
सरसाभिनीभिगुरवर्णकङ्कणलन्न स्तुतिभूषिता गुणरोगा पदमञ्जिनूपुरम्पणगुणदन्यमण्डिता ॥
फणिराजपिङ्गलवर्णिता कविमत्तेभानगदारिका वरकामिनीव मनोमुदं नहि कस्य मा ननु गीतिका ॥
॥ १२ ॥ उदाहरणं यथा ॥ ॥ऽ ।ऽ। ऽ॥ ऽ।ऽ ।ऽ, ।ऽ

जप्यस्तोत्रावलीसम्मुखरितककुजिस्यान्तपद्मार्करोचिः ॥
नानालङ्कारहारिण्यपदलनकरी वीर मूर्त्तिस्त्वदीया
श्रीपद्मीप्रव्रजाढ्यामलमणिनिकरस्रग्धरा हन्तु पापम् ॥ ३४ ॥

॥ अथ द्वाविंशत्यक्षरपादं कृत्वां मदिरावृत्तम् ॥

ये मदिरासुहिता मनुजा न भजन्ति तवाङ्घ्रिसरोजयुगम्
ते जिन निर्गतपुण्यजरा जयजारसुदुःखितमानसकाः ॥
शश्वदशेषशरीरिविशारणकारणचिन्तनरूढहृदो-
नो गणयन्ति परोपकृतिं न विदन्ति गुणं न भजन्ति सुखम् ॥३५॥

॥ १२ ॥ म्रैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥

अन्यत्राप्युक्तं ॥

कर्णं शङ्खयुग्मं कनकमपि च सुवर्णं च मञ्जीरयुग्मं पुष्पं गन्धं वहन्ती द्विजगणरचिता नूपुरद्वन्द्वयुक्ता ॥
हस्तं हारं दधाना गुरुनिजगमना रूपवत्त्यन्यथार्थां मुग्धा केशां न चित्तं नारुथति यथावत् स्रग्धरा कामिनीव

॥ १२ अक्षरणि यथा ऽऽऽ ऽऽ-ऽ॥ ऽ॥ ।ऽऽ ।ऽऽ ।ऽऽ ॥

॥ अथ चतुर्विंशत्यक्षरचरणं संकृत्यां दुर्मिलवृत्तम् ॥

प्रणिधाय भवत्पदपङ्कजमीश जिनेन्द्र भवामयभेदकरम्
ससुरासुरमर्त्यनतं सततं परिदुर्मिलमोक्षसुखप्रददम् ॥
लभते सकलः खलु सौख्यमनन्तमिहापि परत्र च किम्बहुना
प्रणतः सकृदप्यमरैः पुरुषः सततं महितो भवति प्रणयात् ॥३६॥

॥ १३ ॥ सप्तमकाल्पुना सगुर्णादिते यमुदारतरा मदिरा ॥

॥ १३ ॥ उद्दवणिका यथा ॥ ऽ॥ ऽ। ऽ॥ ऽ॥ ऽ॥ ऽ। ऽ॥ ऽ॥

॥ १४ ॥ सगणौ सगणौ सगणौ सगणौ यदि दुर्मिलमेतदवेहि तदा ॥

॥ अन्यथाप्युक्तम् ॥

विनिधाय करं गुरुतल्पमनोहरवाहुयुगं कुरु रत्नधरं सगणं च ततः कुरु पाणितले वरपुष्पयुगं विनिधाय गुरुम् ॥

इति दुर्मिलका फणिनायक संरचिता किल वर्णविन्यासपरा चतुराश्रितविश्रविनिर्णयकृता कविता मुकुताश्रयचित्रपदा ॥

॥ १४ उद्दवणिका यथा । ॥ऽ ॥ऽ ॥ऽ ॥ऽ ॥ऽ ॥ऽ ॥ऽ ॥

॥ अथ चतुर्विंशत्यक्षरचरणं संकृत्यां किरीटवृत्तम् ॥

देवकिरीटमणिप्रकरप्रतिरञ्जितपादसरोजयुगन्तव
जातु सदा मम चेतसि देवविकीर्णसरोरुहचारि सुखाकर ॥
यत्र विजाति नखावलिरीश्वर पद्ममणिप्रकरप्रतिमाङ्गुलि
मस्तकराजिसुधाकरबिम्बसमा शमनिर्जितदोषरिपुव्रज ॥३७॥

अथ चण्डवृष्टिप्रपातनामा सप्तविंशत्यक्षरचरणो दण्डकः पठ्यते ॥

जयजयसुरयक्षविद्याधराधीशमर्त्यादिभिः सङ्कुले सर्वशोभाकरे
समवसरणभूमिभागे यथावत्समावेशितानेकलोकाकुलेऽतिप्रत्ते
मणिकनकविचित्रचञ्चत्प्रभाहारिसिंहासनाध्यासिनो देशना देव ते
त्रिभुवनततकाममोहादिघोरानलोज्झासने चण्डवृष्टिप्रपातायते ॥३८॥

॥ ३५ ॥ अष्टभकारमनोहरबन्धनवृत्तकिरीटमिदं परिभाव्य ॥
अन्यत्राप्युक्तम् ॥

पादयुगं कुरु नूपुरसुन्दरमत्र करं वरवलयमनोहर वर्णे युगं कुसुमद्युसदंगनकुण्डलमण्डयुगं समुपाहर ।
पण्डितपण्डितमण्डलमानसकासितसज्जनमौलिरसाम्भ पिङ्गलभुजगराजनिवेदितवृत्तकिरीटमिदं परिभावय ॥

॥ ३६ ॥ उद्दवणिका यथा ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ऽ।। ॥

यदि नगणयुगं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो मतो दण्डकः ॥

उद्दवणिका यथा ।।। ।।। ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

इति श्रीमज्जिनचरणसरोजचञ्चरीकायमानतपागच्छाधिराजभट्टारकश्रीविजयाचार्यवर्यश्री-
मद्विजयनेमिसूरीश्वरशिष्यमवर्णकयशोविजय विरचितायां स्तुतिकल्पलतायां सहृदयकण्ठशोभिनी
श्रीरोचलगुणगुम्फिता विविधनामगर्भच्छन्दोमयमुक्तकपद्द्वात्रिंशिका.

॥ इतिश्रीचरमजिनेश्वरश्रीमहावीरस्वामिपद्द्वात्रिंशिका समाप्ता ॥

श्रीचतुर्विंशति जिनेभ्यो नमः
श्रीमद्विजयनेमिसूरिभ्यो नमः

अथ स्तुतिकल्पलताया

मकारान्तप्रथमान्तपदं महावीरस्तोत्रं

प्रारभ्यते श्रीमहावीराष्टकम् ॥

देवस्स चिन्तामणि देववृन्दजैत्रप्रणामस्तमवारिधारः
चामीकरोद्द्योतशरीरजासः श्रीवीरनाथो भवद्धानिदोऽस्तु ॥ १ ॥
प्रौढप्रजावो भुवनैकपूज्यः कन्दर्पदर्पापहृदेहजासः
संसारकान्तारगतिश्रमघ्नः श्रीवीरनाथोभवद्धानिदोऽस्तु ॥ २ ॥
कामोन्मद्विप्युद्धिपदर्पघातपञ्चाननो विश्वजनप्रपूज्यः

प्राद्भवनाथप्रविराजमानः श्रीवीरनाथो जगद्धानिदोऽस्तु ॥ ३ ॥

मिथ्यात्वरात्रिप्रबलप्रघातसूर्यायमाणः शिवदानशौण्डः

धीरत्वजैयाचलवंशनाथः श्रीवीरनाथो जगद्धानिदोऽस्तु ॥ ४ ॥

दुःखाग्निमग्नाखिललोककाम्य रज्जूयमाणातुलवाग्विलासः

संसारनीरेश्वरपोतपादः श्रीवीरनाथो जगद्धानिदोऽस्तु ॥ ५ ॥

सर्वापसर्गप्रहतीयमानो ध्यातोऽपि संसोढमहोपसर्गः

यथिश्चनारित्रधरो जिनेन्द्रः श्री वीरनाथो जगद्धानिदोऽस्तु ॥ ६ ॥

अप्रार्थिनामप्रकलनाखिलासक्षीणामराणोऽसमपुण्यदानः

श्रीकेवलालोकविलोकिलोकः श्रीवीरनाथो जगद्धानिदोऽस्तु ॥ ७ ॥

श्रीयास्मृतास्वादमहाप्रपानदेवासुरासेव्यवपुःप्रतानः

संसारसंक्लेशाग्निशामः श्रीवीरनाथो जगद्धानिदोऽस्तु ॥ ८ ॥

इति श्री [illegible]

[illegible] समाप्तम्.

श्रीचतुर्विंशतिजिनेश्वरेभ्योनमः
भगवद्भ्यः श्रीमद्विजयनेमिसूरीश्वरेभ्योनमः

अथ पञ्चवर्गविनिर्मुक्तं श्रीमहावीराष्टकम् प्रारभ्यते

पञ्चेन्द्रियदमं देव्यं पञ्चज्ञानोपदेशकं
पञ्चवर्गविनिर्मुक्तं स्तोष्ये वीरं जिनेश्वरम् ॥ १ ॥
श्रव विश्वाश्रयो वीर शिवावासः सुरेश्वर
श्रीपूप शिष्यशासाय स्वास्य श्रिया विलालस ॥ २ ॥
श्रीवरः श्रेयसे साररावास्यः स सुरेश्वरः
सर्वेषां लालसावासः शीलस.सीशिवावहः ॥ ३ ॥
वरैश्वर्येव विश्वस्य सर्वाय सहसा वर ।
श्रीवीरेशसुराद्दांव उल्लासय शिवश्रियम् ॥ ४ ॥
सुरासुरसुसेव्याङ्घ्रिं सूरिं शूरवं वरम्
सरसं सुवत्रं सस्यं सुरं सेवे ऋषीश्वरम् ॥ ५ ॥

यस्येश्वरस्य मारस्य सर्वाशाविश्रुतं यशः
श्रेयः सुरसुखश्री वः सोऽयं वीरः शिवाय वै ॥ ६ ॥

सर्वाङ्गसमुदारं सर्वार्वं सुरेश्वरम्
श्रमणं संश्रये वीरं शशिलेख्यं वशीश्वरम् ॥ ७ ॥

सुरसः सुरवो यस्य वीरः सेव्यः शिवाय वः
स्वरीशाश्रेयसाम्भोधिः सोऽवाद्वीरो [illegible] ॥ ८ ॥

सर्वमान्यं वरं वीरं सूर्यभासं सुरेश्वरम्
श्रयाम्यहं [illegible] संश्रये मावशोऽक्षमः ॥ ९ ॥

इति श्री [illegible] विरचितं [illegible] समाप्तम्। ॥

श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमः ॥
॥ श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमः

अथ स्तुतिकल्पलतायां

श्री वीरचित्रकाष्टकम् ॥

अथचक्रबन्धः (पद्मबन्धोऽपि)

अविदितगुणमानं सर्वदा ज्ञासमानं
अकलितमहिमानं ध्वस्तमोहाभिमानम् ॥
विहितमदनमानं शान्तिसंशोभमानं ।
प्रकटितपटिमानं नौम्यहं वर्धमानम् ॥ १ ॥

अथ धनुर्बन्धः वसन्ततिलका.

वीरं नमामि विपदादलनं दयालुं
घोरान्धकारविधुरान् विविधोपतापान्

पापान् समुद्धरति योजितत्वाववैरी
दर्पोज्झप्रशमनं जगदेकसारम् ॥ २ ॥

अथ खड्गबन्धः

धीरं वीरं वरन्देव, देवमावसथं श्रियाम्
यद्दर्शनमघध्वंसि सर्वदा तं जिनं स्तुवे ॥ ३ ॥

अथ द्वाभ्यां श्लोकाभ्यां खड्गबन्धः ॥

सारशौर्यासमोदृश्रीजितकाममहारिपुः
पुण्यकेलीगृहं वीरः क्रान्तविश्वः स्वतेजसा ॥ ४ ॥
सानुकम्पो भवच्छेदी शक्रसन्दत्तवाससा
सारं संशोभमानो मां पातु पपात् प्रजङ्कः॥ ५ ॥

अथ शरबन्धः

सर्वदा दारितोन्मादं सर्वोर्द्धिधिपणैर्नुतम्
वन्दे वीरं महाधीरं भवसभ्रससन्नतम् ॥ ६ ॥

अथ त्रिशूलबन्धः

उत्तमतेजसाजासदेहसौन्दर्यनासितम्
तं सदा दासनं देवं वन्दे तं विदितं दिवि ॥ ७ ॥

अथ शक्तिबन्धः

वरं तत्त्वविदामीशं तं शं सौख्यदं वरम्
वरगाम्भीर्यसम्राजं संसंध्यायामि सर्वदा ॥ ८ ॥

इतिश्री निरवद्यनिःसामाज्यगव्यविराजमानतपस्तेजःप्रकरप्रकीर्यमाणकीर्तिनिकरस्वच्छतपगच्छगगन नभोमणीयमानमनस्कमनसीप्सितार्थसार्थचिन्तामणीयमानश्रीमद्विजयनेमिसूरीश्वराचार्यवर्यचरणचञ्चरीकायमाणवर्धमानयशोविजयविरचितायां स्तुतिकल्पलतायां श्रीमहावीरजिनचित्रकाष्टकम् समाप्तम् ॥

श्री चतुर्विंशति जिनेश्वरेभ्यो नमः

श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमः

अथ स्तुतिकल्पलतायां द्वितीयं

श्री महावीर चित्रकाष्टकम्

भगवान् भुवनाधीशो धीशो धैर्यगुणे नगः
गजास्तिर्मोहविध्वंसे पापाद्वीरोऽवतात्समाम् ॥ १ ॥

अथ हलबन्धः

वीरं नमामि विश्वेशं तं शंवप्रभुमीश्वरम्
रम्यसूक्तिजगद्बोधं सर्वज्ञं वरकेवलम् ॥ २ ॥

अथ हलबन्धः

वीरं धर्मप्रदातारं वारं दोषततेर्वरम्
रक्षोद्धारकरं विश्वे वन्देऽहं देवदेवनम् ॥ ३ ॥

जय जनजयहरणचरणकमल जय कनकनुजयवरजनशरण
जय समसहमदवदहनदक जयवरजनजरननततपदक ॥ ४ ॥

अथ समासगुप्तं

प्रवलमदनदावं घोरमोहप्रतानं प्रकुपितमदकालव्यालसङ्घप्रचारम्
जववनमधिगम्य श्रेणिसौख्याय यस्याजिजवति शरणं सत्रायतां वोऽथवीरः ॥५॥

अथ गोमूत्रिकाबन्धः

सम्पदानपरं वन्दे लोकजालस्य पालिनम्
विपन्मानहरंमन्दे शोकजालस्य पातिनम् ॥ ६ ॥

अथ पद्मबन्धः (अयं गोमूत्रिकाबन्धोऽपि)

जिनश्रीनघनध्यान च्छिनमानघनस्वन ॥
घनदीनजनग्लानं जनसन्नतनन्दन ॥ ७ ॥

अथ प्रथमान्तकन्यः

विश्वत्रयत्राणनिबद्धचेताः कुबोधविध्वंसनवाग्विलासः
तृष्णातमस्संहरणो मुनीशः श्रीवीरदेवः सुखदः सदाऽस्तु ॥८॥

इतिश्रीसहृदयहृदयारविन्दविकासनसवितायमानसकलजनमनोऽन्तस्तापशमनपीयूषायमाणभीष्मभवबन्ध
भ्रान्तिवन्याग्निप्रच्छान्तिदानैककल्पतरूयमाणश्रीमद्विजयनेमिसूरीश्वराचार्यवर्यचरणचञ्चरीकायमाणप्रवर्तक
यशोविजयविरचितायां स्तुतिकल्पलतायां श्रीमहावीरचित्रकाष्टकम् समाप्तम्. ॥



श्रीचतुर्विंशतिजिनेश्वरेभ्यो नमः ॥

॥ भगवत्पः श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमः ॥

अथ स्तुतिकल्पलताया मकारान्तचतुर्थ्यन्त पदैः

श्री महावीरस्तोत्रं प्रारभ्यते.

॥ श्री महावीराष्टकम् ॥

सर्वाघनीततमविनाशकसूर्यदेवचण्डप्रतापकलिताय जिनेश्वराय
देदीप्यमानशशिसौम्यमुखाम्बुजाय वीराय वीतमदनाय नमो नमोऽस्तु ॥ १॥
श्रीनन्दिवर्द्धनकृपापरिपूरिताय सिद्धार्थनन्दवराय गुणकराय
पापापहाय शिवसौख्यकराय शश्वत् वीराय वीतमदनाय नमो नमोऽस्तु ॥२॥
मुक्त्यङ्गनानयनहृतमहाव्रताय वीतप्रमादरिपुकाय दमाकराय
मार्तण्डपद्मसदृशाय गतस्पृहाय वीराय वीतमदनाय नमो नमोऽस्तु ॥ ३ ॥

ऐश्वर्यनासितजगत्त्रयमण्डलाय पारङ्गताय परमाय सुरेश्वराय
संशुद्धचेतनमयाय जिनेश्वराय वीराय वीतमदनाय नमो नमो नमोऽस्तु ॥४॥
स्वर्णाब्जदेहविलसद्युतिराजिताय निर्लोभहंसरतिमानससोदराय
सद्धर्म मार्गवरदेशनकारकाय वीराय वीतमदनाय नमो नमोऽस्तु ॥ ५ ॥
सिंहाङ्किताय सरसध्वनिशोभिताय ध्येयाय गेयगुणगुम्फितविग्रहाय
सर्वाविजयचक्रसारविराजिताय वीराय वीतमदनाय नमो नमोऽस्तु ॥ ६ ॥
विश्वाश्रितंसमुकुटाय मनीश्वराय सत्प्रातिहार्यपरिशोभितसमाश्रयाय
संसारसारशरणाय मुनीश्वराय वीराय वीतमदनाय ममोऽस्तु ॥ ७ ॥
लोकोपकारकरदेशनवाक्यपुष्पसौरभ्यलुब्धसमसुरासुरभृङ्गकाय
चारित्रदीपकवराय सुरस्तुताय वीराय वीतमदनाय नमो नमोऽस्तु ॥ ८ ॥

इति श्री [illegible] श्रीमद्विजयनेमिसूरीश्वरचरणचञ्चरीकायमाण विनेय[illegible]विजयविर-
चितं [illegible] श्रीमहावीराष्टकं समाप्तम्.

श्री चतुर्विंशतिजिनेभ्यो नमः
श्रीमद्विजयनेमिसूरीश्वरेभ्यो नमः

अथ स्तुतिकल्पलतायां श्रीमहावीराष्टकम्.

श्रीवीरं वैरमुक्तं प्रतिदिनमनघं मानवानां नवानां
वाञ्छापूर्तिं वितन्वन्तमहकममहं सदयानां दयानाम्
शूरं शूरं शरीरस्थितरिपुदलने वास्तवानां स्तवानां
स्तोमैः सोमैः समस्तैः शमदमनियमैः संस्तवीमि स्तवीमि ॥ १ ॥

ये त्वां सन्मधुराक्षरैरहरहस्तोष्टूयमानास्तवै
राधिव्याधिरुपाधिरास जविनां दूरं प्रयाति क्षणात्
सद्यस्स्वर्गवदेव देव जवति प्रज्ञावतां प्राणिनां
दासन्त्येव सुरावराः सुरमणिस्तेषां च हस्ते स्थितः ॥२ ॥

घोरक्रोधतरक्षु कामशबरं दुष्कर्मपञ्चाननं
मायाजाललताप्रतानगहनं मानोममत्तद्विपम्
सम्फूत्कुर्वदमन्दलोभभुजगं रागोग्रशार्दूलकं
संसारं विपिनं तदस्ति नविना कस्त्वां विनाऽत्राश्रयः ॥ ३ ॥
विख्यातो धरणिप्रकाशकुशलोऽहं सर्वलोकप्रियः
सूर्य त्वं किमु शूरतां प्रथयसीत्येवं क्ष्मामण्डले
श्रीवीरस्य समस्तलोकविदितं कर्मक्रियाविष्कृतं
किन्नालोकयसे त्रिलोककलनाकोशल्यमानन्दम् ॥ ४ ॥
संसञ्चिन्त्तितदानकौशलकलाकेलीधराणां वर
त्वं किं कल्पतरो करोषि सततं दर्पं विनिःशंककम्
विश्वेषां विकटप्रकोटिकलितक्रोधाद्दराणां नृणां
किं संपश्यसि नैव वीरचरणान् संदर्शनात्कामदान् ॥ ५ ॥

जन्तु त्राणकराय सर्वजविनामानन्ददानाय च
ज्ञानानन्दमयाय नित्यमखिलध्येयाय गेयाय च
भव्यानां भवनाशन य परमज्योतिःस्वरूपाय च
श्री वीराय जिनाय विश्वपतये नित्यन्नमस्तान्मम ॥ ६ ॥
गीर्यस्यायस्खलितप्रचाररचना पीयूषवर्षायते
संसाराम्बुधितारणे जगवतः पादोऽतिपोतायते
भव्यानां भवभीमकूपपततां हस्तो वरवायते
सप श्रीजिनकुञ्जरः परमसंशार्तिं विधत्तान्मम ॥ ७ ॥
चिन्तारत्नमतिप्रियं न भवति प्राज्यं न राज्यन्तथा
चक्रित्वं न मनोरमं मम तथा देवेन्द्रता नो प्रिया
नो रम्याणि भवन्ति मेऽतिहृदये हर्म्याणि वीरप्रभो
किन्त्वेकन्तव पादपद्मशरणं मे सर्वदा सुप्रियम् ॥ ८ ॥

इति [illegible] मानसमरो[illegible]हंसायमानानि [illegible]
[illegible]श्रीमद्[illegible] [illegible]
[illegible]लतायां श्रीमहा[illegible]कं समाप्तम् ॥

श्री चतुर्विंशतिजिनेभ्यो नमः

श्रीविजयनेमिसूरीश्वरेभ्यो नमः

अथ स्तुतिकल्पलतायाम्.

॥ स्वगुरुसूरिशतकम् ॥

विपुलकीर्त्तिभरेण हिमत्विषो विजयिनामृतगर्वमुचा गिरा
कृतपदं सकलागमपारगं विजयनेमिगुरुं महितं नुमः ॥ १ ॥
स्तुवन्नहं त्वां बुधहास्यधाम तथापि भक्त्या प्रलपामि नाथ
यथेष्टमालप्य शिशुर्वचांसि न किं प्रमोदं प्रतनोति पित्रोः ॥ २ ॥
स्पृष्टो नमस्कारपथं प्रयातो ध्यातो नुतः पूजितुमीहितो वा
त्वं सर्वलोकोपकृतेर्विधाता पूज्योऽसि केषां न जगत्त्रयेऽस्मिन् ॥ ३ ॥

त्वद्दर्शनान्नाथ शरीरिणां सदा नश्यन्ति पाशा दृढकर्मणामपि
नद्धा न किं तार्क्ष्यविलोकनादहेः पाशा विनाशं सहसा व्रजन्ति हि ॥ ४ ॥
अचिन्त्यसौख्याप्तिफलाफलश्च यैर्यैस्तु दृष्टोऽसि जगद्गुरुस्त्वम्
पुण्यानुबन्धीनि कृतानि तैस्तैर्महान्ति पुण्यानि महाफलानि ॥ ५ ॥
ते नाभिनः शुद्धगुणा भवन्ति निर्दोषसारा प्रकृतेर्हिताधाः
तस्माद्भवन्नाथ सदा नमामि आप्तं भवन्तं जगतीहितं च ॥ ६ ॥
आसादिताशेषसुखं सुखीनं पापप्रमुक्तं मुनिपुङ्गवञ्च
श्रीसाधुमर्त्यैरभिवन्दितन्तं श्रीनेमिसूरिं प्रणमामि भक्त्या ॥ ७ ॥
येनोद्धारि किल सूरिपदं सुयोगैर्लोकोपकारकुशलं गुणगुम्फितेन
श्रीवीरशासनशुभोन्नतिकारकस्तु सूरिर्जयत्यखिलशास्त्रविचक्षणोऽयम् ॥ ८ ॥
रत्नत्रयोद्योतितदिग्विभागकः समस्तसङ्घस्य च भद्रकारकः
[illegible] वर्णभवयं चिराय जयाद्भवभेदको नृणाम् ॥ ९ ॥

[illegible] उपासकस्य शरणं स्थिता नृणाम्
समस्तलोकाखिलसौख्यदायकं चिन्तामणेरप्यतिशायि भूतले ॥ १० ॥
वाताभ्रविभ्रमसमक्षयसौख्यरक्ते दुःखानलप्रकलितान्तरवृत्तिलोके
कालायिते कलियुगेऽथ तव प्रशस्यं केषां न पादयुगलं वरसौख्यहेतुः ॥ ११ ॥
श्री नेमिनाथपदपङ्कजवासिनो नो स्कन्दन्ति दुःखलवमप्यथ मानवास्तम्
पापापहारकरणं चरणं नराणाम् यस्य श्रयामि शरणं प्रभुनेमिसूरिम् ॥ १२ ॥
दुःखाग्रखलानलदकोपममासमान्यं विस्तीर्णजृम्भितबलाजितमन्त्रराजं
ओं ह्रीं प्रदीप्तमुनिमण्डलवार्धिचन्द्रं नेमिप्रभो इति जपाम्यहमत्र सारम् ॥१३॥
नाथे त्वयि श्रितवति क्षितिमण्डलेऽथ किन्तु जनो मयि करिष्यति मोहमोही
नृणां मयूरवरजानसमाश्रितानाम् किं स्याद् भयं क्षितितले पवमानजन्तोः ॥१४॥
प्राप्तप्रधानविजया विनतं जनन्तो भूद्धिः समृद्धिकलिता सकलप्रशस्ता
ग्रामेन्दुनेव इव सौख्यकरा वरा ते भूयादिति प्रमनसा वयमुत्तम श्रास ॥१५॥

शास्त्रसन्दोहवेत्ता यः सर्वसाधुगुणान्वितः
विजयनेमिसूरिः स जयत्यात्मनो गुरुः ॥ १६ ॥
चन्द्रतुल्यं महोराजं परसौम्यकरं वरम्
नमामि सर्वदात्तासं निष्कलङ्कं महामुनिम् ॥ १७ ॥
शान्तं शान्तमनोवृत्तिं शर्मदं शर्मशालिनम् ॥
मुनिं मुनिं मनोज्ञतया वन्दे वन्देन्द्रवन्दितम् ॥ १८ ॥
दुर्जातदुर्गदुर्गाणां दुर्गतानां च देहिनाम्
दुर्गदुर्गततातेदं दुर्गतित्रायकं मुनिम् ॥ १९ ॥
देहदेवनदेवन्तं दोषदोषानिवारकम्
वन्देवं वन्दको वन्द्यं रूपरूपकरं वरम् ॥ २० ॥
सूरिं सूरिवरं सूरं सार्थसार्थसुसेवितम्
सर्वदा सर्वदात्तासं वन्देऽवन्देव देवकम् ॥ २१ ॥

उपध्युक्तावकं सूरि मुपतापवितापकम्
उपप्लवपरिप्लाव मुपरागोपमर्द्दकम् ॥ २२ ॥
दुर्ग्राहसुगुणग्राम माधिव्याधिविनाशकम्
सूरिं सूरिं सदा नौमि दुर्जेयदुर्जनोज्जयम् ॥ २३ ॥
दुर्दान्तदुर्दुरूढानां दमकं शमकं मुनिम्
दमनं दमनं वन्दे सूरिं सूरिजनैर्नुतम् ॥ २४ ॥
मूढारममूढताजेदं मतिमानविवर्जितम्
मुहुर्मुहुरहं वन्दे चक्राङ्कयोजितो मुनिम् ॥ २५ ॥
कान्तकान्तिसुकान्तन्तं उज्ज्वलल्ललाटपट्टकम्
शास्यशास्तारमीशं च नौमि भक्तिभरात् त्रिधा ॥ २६ ॥
आनन्दकन्दफुल्लन्तं सौख्यवल्लीवितानकम्
संसारासारताबोधं भूयो भूयः स्तवीम्यहम् ॥ २७ ॥

[illegible] ॥

इति परोपकारस्त्वं जय सर्वगुरो सदा ॥ २८ ॥

राजीवराजमानास्यं भव्याकृतिसुशोभितम्

मानवामानवैः पूज्यं त्रिकालं तं नमाम्यहम् ॥ २९ ॥

त्वद्धामगारुडं मन्त्रं मोहाहिविषघातकम्

इच्छामि सर्वदा भद्रं त्वत्स्तुत्येकपरायणः ॥ ३० ॥

विनयं विनयाधारं सूरिणं सूरिणम्मुदा ।

विनयो विनयग्राही विनतो विनतोऽस्मि तम् ॥ ३१ ॥

विधूतविधिकव्याधिं विदा विदारकं विदाम् ॥

विकारविक्रविक्रान्तं विदितं विदितं विदाम् ॥ ३२ ॥

रुजा भीतैर्यथा वैद्यो व्याघ्रभीतैरिवानलः ॥

तापतान्तैर्यथा वृक्षो वन्हिभीतैर्यथा जलम् ॥ ३३ ॥

जाड्यजीतेर्यथा सूरिः पापजीतेर्यथा जिनः
यथागुह्यवर्पजीतेः शत्रुः सिद्धजीतिजिः ॥ ३४ ॥
सिन्धुजीनेर्यथा नौका सर्पजीतेस्तु गारुडः
जयजीतिसमाक्रान्तैस्त्वमस्माभिः समाश्रितः ॥ ३५ ॥
समुपार्जितपुण्योघं पोपयित्नुमयावसे:
वन्देऽहं परया भक्त्या विजयनेमिसूरिणम् ॥ ३६ ॥
जय नेमिविभो प्रभो ममामतिमोहप्रविमर्दैक क्षणात्
तव सक्रमृते जना मनाग् न भवाब्धिं प्रतरन्ति तेऽप्लवाः ॥३७॥
भजते तु विरक्तमानसं मुनिमन्यो गुणधाम सादरम्
प्रभजाम्यहमुद्यतप्रजं क्रमयुग्मं दृढरागमेव ते ॥ ३८ ॥
न च कर्महनीयतां गतः परमां त्वं नयमानतत्त्ववित् ।
अविवेकिजने मयि प्रभो त्वमथो देहि विवेकसंस्तवम् ॥ ३९ ॥

शशिसौम्यमुखाकृते सदा सुखमेधस्व मुनीश्वरासमम्
नवपादमृते न च प्रभो शरणं पञ्चजीमपावके ॥ ४० ॥
अयमास तवानलद्युति स्त्रिजगत्सश्चरणेऽप्यकुण्ठितः ।
नविमोहतृणोत्करन्दहन् सुजने शीततरः प्रतापकः ॥ ४१ ॥
त्वमसि सप्तजयोदधितारकस्त्वमसि विश्वजनोदयकारकः
त्वमसि भव्यजनप्रतिपालक स्त्वमसि बुद्धिविशुद्धिकरःपरः ॥४२॥
त्वमसि शासनरक्षणतत्परः त्वमसि धर्मधनः पुरुषोत्तमः
त्वमसि दर्शनहर्षितसज्जन स्त्वमसि गच्छनियामकतल्लजः ॥४३॥
त्वमसि शीलविभूषणधारकस्त्वमसि सद्व्रतभारधुरन्धरः
त्वमसि मर्त्यनतोऽभुवि वत्सलस्त्वमसि नेत्रसुधारस एव च॥४४॥
त्वमसि शङ्करःकरुणानिधि स्त्वमसि भीतिहरः परमो मुनिः
त्वमसि सञ्चितपुण्यभरो वर स्त्वमसि सूरिपदप्रविराजितः॥४५॥

पदयुगं तव वर्णयितुं कथं कथय सूरिवर प्रजवाम्यहं
व्रजति शीतकरः कमनीयतामधिजिगांसुरमुं नखकैतवात् ॥ ४६ ॥
सुमतिधामनरेश्वरबोधदो विजितपञ्चशरादिभटव्रजः
विजयनेमिगुरुः सुगुणाकरो भवतु हंसगतिः सुखकारकः ॥४७ ॥
प्रवरवस्तुविवेकतिरस्कृतो न हृदये तव राग उदेष्यति
इति विचिन्त्य तवाधरपल्लवे तमनयद्विधिरीश्यगुणव्रज ॥ ४८ ॥
कमलकाम्यविलोचनविद्रुमाधरदलं दलयन्तमघव्रजं
विपुलशारदचन्द्रमुखं पुनः प्रवरसंवरसूरिमहं स्तुवे ॥ ४९ ॥
मम समीहितकल्पतरुं गुरुं जगति पल्लविताप्ययशश्चयं
दधतमागमसारफलोच्चयं विमलवाक्कुसुमप्रकराश्रितम् ॥ ५० ॥
दुरिततापितसंसृतिकाननभ्रमणतान्तिहरं पदसेविनाम्
विततशाखमुदारविनेयकैर्विजयनेमिमुनिं महयाम्यहम् ॥ ५१ ॥

समुचितकृतिको यः प्राज्ञलोकेषु शश्वन्निरुपमसुखराजीहेतुरालस्यनाशी
सकलसुकृतिलोकासेव्यमानक्रमाब्जो भवतु भविनराणां सोऽत्र सौख्याय सूरिः॥५२॥
तव वचनदृलीपा नैव चेन्मादृशानां विकृतहृदयभूमेः शुद्धिसम्पादिकेयम्
न भवति च तदानीं मीदृशानामशुद्धया शुभफलसमवाप्तिः सौख्यदूतेः समाना॥५३॥
तव वचनमताली मादृशानां जनानां त्रिभुवनजनमान्या शान्तिसौख्याभिरम्या
विगतदुरितभारा दोषनाशेन सारा हृदयवरपदेऽसौ राजमाना सदाऽस्तु ॥ ५४ ॥
दिनपतिरिव नित्यं यःप्रमोहान्धकारक्षपणकर उदेति प्राप्तपुण्यप्रकर्षः
जगदमरपथे स त्रायकः पापकूपात् भवतु भविजनानां नेमिसूरिः सुखाय ॥ ५५ ॥
कुनयविपिनभङ्गे मत्तमातङ्गकल्पा निखिलभविकलोका नन्ददा यस्य वाणी
परिभवति विनिर्यन्माधुरी धैर्यसारा तुहिनकररसौघं नेमिसूरिः स जीयात् ॥५६॥
यः स्त्रीपदीव्यक्तिदिग्सच्छलान्नृणाम् दुर्मोहरात्रिप्रजिदानिबन्धनम्
सूपं दधाति प्रशसन्तभाकरः सूरिर्गुणानां भवहानयेऽस्तु सः ॥ ५७ ॥

यः कर्मपङ्केऽस्ति निदाघकल्पः दुर्वादिपद्मे शशिभासकल्पः
भ्रान्तिदोषागणजानुकल्पः जीयात् स सूरिर्जिनबोधकल्पः ॥ ५८ ॥
दुर्बोधनाशं व्यधित स्वशक्त्या पूर्णस्तु यो जैनमतानुरक्त्या
तं भूपितो यः शुभकर्मपक्त्या आचार्यवर्यं प्रणमामि भक्त्या ॥ ५९ ॥
यो रक्तभासक्रमजच्छलाद् दुर्मोहान्धकारप्रलयाय धत्ते
सोऽयन्तु सन्ध्यारुणचन्द्रलेखां सौख्याय भूयाद् भयनाशनो मे ॥६० ॥
क्रोधोमदन्तावलदन्तघातविधानदक्षातुलभाविलासाम्
ज्योत्स्नां क्षमेन्दोः प्रविभर्त्ति सूरियों दन्तजातच्छलतः स जीयात्॥६१॥
नाथश्रेणिं सूरीशानम् मोहोच्छेदं क्रोधच्छेदम्
लोकानन्दं काव्याकन्दम् वन्दे वीरं विश्वे धीरम् ॥ ६२ ॥
लोकाश्रेयं सर्वाजेयं सूरिं ध्येयं ज्ञातज्ञेयम्
... वन्दे नित्यं दत्तौषध्यम् ॥ ६३ ॥

सर्वज्ञाता विद्यादाता प्राज्ञध्यातो विश्वख्यातः
सूरिर्दान्तः कीर्त्याकान्तः शश्वज्जीयात् जव्यं देयात् ॥ ६४ ॥
साधुश्रेष्ठं संपज्ज्येष्टम् नित्यं तुष्टं पुण्यैः पुष्टम्
दीनोद्धारं विश्वे सारम् वन्दे शिष्टं नष्टारिष्टम् ॥ ६५ ॥
राकाकान्तज्योत्स्नाकान्ताम् विव्रत्कीर्त्तिं विश्वव्यासाम्
कुर्यात् सम्पद्धिं शान्ताम् विभ्राणस्तां मूर्त्तिं दान्ताम् ॥ ६६ ॥
के सद्गुणास्तव विजो न च वर्णनीया प्रज्ञादयाप्रभृतयस्तदपीह नाथ
ज्ञानक्रियाढ्यहृयः शिववर्त्मगामी संशान्तियन्तृजिनधर्मरथोऽतिजाति ॥ ६७॥
कुन्देन्दुहारघनसारसमानकान्तिस्त्रैलोक्यविस्मृतसुधामधुरप्रचाराम्
कीर्त्तिम्मनः कुमुदवृद्धिविधानदक्षाम्बिभ्रत् सुखानि तनुताम्मम नेमिसूरिः॥६८॥
जीयात् सुधामधुरवाक्प्रकरामृतौघसंसेचनैधितजिनागमजक्तिवाह्लिः
दुर्वारमारमदवारणनाशदक्ष प्रोद्यद्विवेकहरिचित्तवनो मुनीशः ॥ ६९ ॥

धर्मोदयप्रथनपूर्वदिगाननेन्दुः दुर्वादिकौशिकचयक्षयवाक्यभानुः
शास्त्राब्धिमन्दरविलासिमतिप्रकर्षः श्रीनेमिसूरिरतुलाम्मुदमादधातु ॥ ७० ॥
आपन्नदीविततनिर्झरकूलगर्जत्क्रोधोग्रपंचवदने दुरितप्रपाते
दंभच्छलादिखनिके शतकोटिकल्पं मानाचले विजयनेमिमहं स्तवीमि ॥७१॥
जिनागममहोदधिप्रमथनासरत्नत्रयम् जगद्भविजवामयोत्कपणचारुधन्वन्तरिम्
समस्तजनताज्ञतारजनिनाशभानूदयम् अतुल्यगुणगुम्फितं विजयनेमिसूरिं स्तुवे॥७२॥

सुरूपजितमन्मथं यमिह देवराजो मुनिम्
निरीक्ष्य चकितान्तरो छिनयनोऽप्यसौ सम्प्रति
सहस्रनयनप्रथां व्रजति विश्वसंव्यापिनीम्
अयं जगति सूरिराट् मुनिमनःप्रमोदास्पदम् ॥ ७३ ॥
कुवादिकरटिव्यथाकरणबद्धकक्षा सदा
तवानुपमजारती मृगनृपांगना सर्वदा

निजानिव मुनिव्रजान् सुतगणानवन्ती सदा
अखण्डितपराक्रमा जयति मेदिनीकानने ॥ ७४ ॥
प्रमोदभरनर्तिता इव विकस्वरा यस्य सत्
प्रलोकनसमुद्धतास्तरुवराश्च पुष्पच्छलाद्
भवन्ति जनसौख्यदाः सततमेव रोमाञ्चिताः
प्रमोदयतु मानसं न विदुषामयं किं मुनिः ॥ ७५ ॥
यः स्याद्वादवचोऽमृतेन सुजनश्रोत्रं प्रहर्षायति
यो ब्रह्माढ्यतेजसा मुनिवरः पृथ्वीं समाक्रामति
यो गाम्भीर्यगुणेन संयमपटूरत्नाकरं क्रामति
सोऽयं धर्मपराक्रमो विजयते सूरिर्गुणानां निधिः ॥ ७६ ॥
यःसत्याध्वगतो मतो बहुजनानन्दप्रदानो मुनिः
विद्यावैभवन्यक्कृतामरगुरुः सूरीश्वरः सर्वदा

यः सम्यक्त्वविभूषितः सुमनसां पूज्यश्च यः सर्वदा
सोऽयं वीरवचोऽनुसारिवचनोऽस्माकं मुदे स्तात् सुधी : ॥ [redacted] ॥
श्रीसङ्घोपकृतिप्रबद्धमनसा शास्त्रोक्तरीत्या सदा
यावच्छ्रीसकलानुयोगकलितप्रज्ञप्तिसूत्रं पुरा
लब्धं येन मनोज्ञपण्डितपदं प्रोद्वहयोगेन च
सोऽयं पूज्यतमः सदा विजयते देवेन्द्रपूज्यैरपि ॥ ७८ ॥
दुःखमामदुरब्धदुःखितजनाः सोढ्यं दुरापं क्षणात्
संसंप्राप्तपरप्रजावविनया यन्नामसंस्मारकाः
प्रापन्त्यप्रतिमक्रमप्रविणमच्छीर्षाः स नेमिप्रभु
र्भूयान्मे महते फलाय सहसा सूरीन्द्रसन्तानकः ॥ ७९ ॥
धारासार इव च्चनत्यवितथं यस्योत्तमा भारती
धर्माधर्मपरीक्षणा धवधवा श्रीधार्मधार्या वरा

श्रीधूलीकृतधैर्यवर्यविबुधो धर्मप्रियो धर्मद
स्ताराधीधवधच्छविर्विजयते सूरीश्वरोऽयं सदा ॥ ८० ॥
यस्याछादपयः पवित्रमनसो मर्त्या अमर्त्यैरपि
भ्राम्यन्ति भ्रमबोधभावविरहाः श्रीवन्द्यपादा भुवि
सद्बोधांशुनिरस्तमोहतमसं पाखण्डदोषापहम्
श्रीनेमिं प्रणतोऽस्मि तं मुनिवरं भक्त्या त्रिधा सूरिणम् ॥ ८१ ॥
भूमीमण्डलमौलिरत्नसदृशं प्रेमप्ररूढाननो
विद्वच्चित्तचमत्कृतिप्रदमरं स्वाज्ञानजालापहम्
भक्त्या विग्रहधारिधर्ममिव तं प्रास्तप्रपञ्चं मुनिम्
सूरिं स्वीयगुरुं नमामि मतिदं श्रीनेमिकल्पद्रुमम् ॥ ८२ ॥
निन्दानो दृढसंशयान्नयपदे सद्यः प्रमादोच्चयम्
छिन्दानो भविनां क्रिशसु सदसा पाखण्डवादोद्यमम्

कुर्वाणो विफलं मधुव्रतसखेर्वाञ्छये जिनेन्द्रागमे
विन्दानोऽतिबुधत्वकीर्त्तिमतुलां जीयात् स नेमिप्रभुः ॥ ८३ ॥
श्रीनेमीश्वरसूरिराजतुलनां युष्मत्प्रतापस्य संप्राप्तुं
व्योमवने विधाय तपनं सोऽप्राप्य तां किस्वयम्
सायं वाडवजातवेदसि पतत्यङ्गारकल्पो यतः
प्रातः प्रातरयं सदोदयगिरौ सूर्यो दरीदृश्यते ॥ ८४ ॥
धर्मायोजनधर्ममर्मदिशकः श्रीधर्मवर्मा नृपु
धर्माचार्यवरोनरोदधिसुतः श्रीधर्मवृद्धो भुवि
निर्मायो महितो महेभमहिमहिः श्रीमारमारो मुनिः
राद्धान्तोदधिरम्यरामरसिकः संराजते सम्प्रति ॥ ८५ ॥
गुणानामावासो विहितहितहर्षश्च जनिषु
निजव्याहारज्या कुगतिपतितानुद्धरति यः

श्रीधूलीकृतधैर्यवर्यविबुधो धर्मप्रियो धर्मद
स्तारासीधवलच्छविर्विजयते सूरीश्वरोऽयं सदा ॥ ८० ॥
यस्याह्लादपयः पवित्रमनसो मर्त्या अमर्त्यैरपि
भ्राम्यन्ति भ्रमबोधभावविरहाः श्रीवन्द्यपादा भुवि
सद्बोधांशुनिरस्तमोहतमसं पाखण्डदोपापहम्
श्रीनेमिं प्रणतोऽस्मि तं मुनिवरं भक्त्या त्रिधा सूरिणम् ॥ ८१ ॥
भूमीमण्डलमौलिरत्नसदृशं प्रेमप्ररूढाननो
विद्वच्चित्तचमत्कृतिप्रदमरं स्वाज्ञानजालापहम्
भक्त्या विग्रहधारिधर्ममिव तं ध्वस्तप्रपञ्चं मुनिम्
सूरिं स्वीयगुरुं नमामि मतिदं श्रीनेमिकल्पद्रुमम् ॥ ८२ ॥
भिन्दानां दृढसंशयान्नयपदे सद्यः प्रमादोच्चयम्
छिन्दानां भविनां किशासु सहसा पाखण्डवादोद्यमम्

यो जानुः समुदयति सर्वान्धतमसं
स्मृतोऽपि व्याकर्षन् पदनखमिषान् नेमिसुगुरोः ॥ ९२ ॥
सुधासौन्दर्याढ्यं तव वचनमास्तां मम मुदे
विशाले संसारे विषयमृगतृष्णापरिचयात्
मुहुर्भ्रामं भ्रामं बहुतरपिपासाकुलतनोः
हरन्मोहग्लानिं भवपथिकखेदं प्रशमयन् ॥ ९३ ॥
अरे काम त्वं किं विसृजसि शरान् व्यर्थमधुना
स्फुरच्छास्त्रव्राताद् घनमजजितेयं सुकवचम्
जनाः प्राप्ताः श्रीमद्गुरविजय... ...धगुरो
र्जिनप्रोक्ताचारप्रचरणसमाः दृढतरम ॥ ९४ ॥
हतो मोहक्रोध स्त्वमसुपगतो लोभकतरो
भवान् स्थातुं मर्त्ये व्रज विषयतृष्णे त्वमधुना

कले कस्ते दर्पः प्रसरति मुनेर्देशनमहा
नटे श्रीमन्नेम्याऽयविबुधवयस्य परितः ॥ ९५ ॥
स्फुरन्मोहनिदाघार्त्ति शमयन् स्वदनोऽमृतैः
श्रीनेमिसूरिमेघोऽयं पुष्णातु शुभवल्लरीम् ॥ ९६ ॥
मन्त्रीक्षादायकं सूरिं शिक्षादापकमेव च
प्रेमप्रकर्षकल्यस्या भक्त्या तं प्रणतोऽस्म्यहम् ॥ ९७ ॥
विषयव्याधिनिर्मुक्तं शुद्धसिद्धान्तदेशकम्
निःस्पृहं नायमेकन्तं स्तुवे श्रीनेमिसूरिणम् ॥ ९८ ॥
घटिकादिवसावद्य सफलत्वमवापतुः
वाणी मे सफला नाथ त्वद्गुणे यत्समाश्रिता ॥ ९९ ॥
त्वन्नतिलीनचित्तोऽहं स्तवमीहे सदा तव ॥
तथाप्यज्ञतया नाथ शब्दोपाधिरमाम्यहम् ॥ १०० ॥

उचलितमरुपानलप्रशमवारिपूरस्य ते
इतिस्तवपरस्य संकलितदोषवृत्तेर्मम
गुणा हृदयतोषदा भविकबुद्धिजासोदया
भवन्तु सुखदायकाः पृथुभवामयोच्छेदकाः ॥ १०१ ॥
श्रीमच्चान्द्रकुलोदधिप्रविलसच्चन्द्रोदयस्य व्यधात्
श्रीमन्नेमिविजोस्तवं निजगुरोः प्रौढप्रभावोन्नतेः
शिष्यस्तद्गुणरञ्जित त्रिभुवनप्रख्यातकीर्त्तिर्मुनि
स्तस्य प्रीतिभरात् यशोविजय इत्याख्यो बुधानां मुदे ॥ १०२
आपं आपं त्रिभुवनहितं सैष चारित्रतन्त्रं
नापन्नाय स्वयमतिमहं श्रीगुरुं स्वान्तपद्मे
गायं गायं गुणगणनिधिं नेमिसूरिं सदाहं
ध्यायं ध्यायं श्रितगुणगणं श्रीजिनं सञ्चरामि ॥ १०३ ॥

यस्मिन् सूरिगुणाकरे पुरवरे जावालिधानेऽभवत्
त्रिद्व्यङ्केरवपूर्जितस्य सुगुरोः श्रीनेमिनाम्नः प्रभोः
योग्यं सूरिपदं ममापि समभूत् यत्नः फलावाप्तिमान्
श्रीनेमीश्वरसूरिराज्यसमये तत्रैव तद्भक्तितः ॥ १०४ ॥
सूरिस्तोत्रमिदं यशोविजयकश्चक्रे शतश्लोककम्
चातुर्मास्यनिवासमाप्य युगवह्न्यब्धिद्विसंख्यामिते
वर्षे वीरशिवात्ततः परिगते भाद्रे सिते पञ्चमी-
तिथ्यां पुण्यमहानिशीथसमयस्योद्घोषयोगं वहन् ॥ १०५ ॥
अन्यूनश्रमहृद्यपद्यरचनाचाराः कियन्तो सन्ति ये
वाग्देवीं समुपास्य तत्वकथनाभ्यासप्रपूर्णा बुधाः
ते धन्याः परदोषकीर्तनविधौ मूका इवाहर्निशम्
नन्दयेव हि ते स्रवन्त्यपि वृथा मार्गेऽपि सञ्चारिणः

स्तोकश्लोकमुदारवृत्तरचितं सम्प्राप्य ये कुर्वते
भूतानिष्टमनोजिरुज्झितनयाः भूयश्चतुष्पादिकाम्
तेऽनल्पा इह सन्ति मन्दमतयः प्रोद्भूढगर्वा भुवि
धन्यास्ते कवयो जयन्ति भुवने ये शक्तिमन्तः स्वयम् ॥
ये मर्त्याः प्रपठन्ति सूरिनवनं कल्याणकेलीगृहम्
ते विज्ञानमवाप्य धर्ममतुलं सम्प्राप्नुवन्ति स्थिरम्
लोके ख्यातिमुदारतां वहुधनं सम्प्राप्य भूयोभव-
भ्रान्त्युच्छेदि भजन्ति चान्तसमये चारित्रमत्युज्वलम् ॥

इति श्री कुन्देन्दुहारघनसारकाशकुसुमनीरक्षीरमरालमृडाल्यादिकान्तिप्रतिपक्षक्षोणीमण्डलप्रतापमानकीर्तिपुण्डरीकस्य सहस्रकिरणसहस्रप्रभाभासमानप्रताप्रानलज्वालाप्रदत्पतङ्गायमानक्रोधादिगणस्य महोपदेशामृतनिर्झरसेचनपल्लवितजिनधर्म्मामृतफलदानशौण्डीरकल्पवृक्षस्य श्रीमद्विजयनेमिसूरीश्वरस्य पादसरोरुहमचलम्मकरन्दरसास्वादतन्द्रिलमानसमिलिन्देन यशोविजयेन प्रणीतायां स्तुतिकुसुमाञ्जलौ स्वगुरुसूरिशतकं समाप्तम् ॥

श्री चतुर्विंशतिजिनेभ्यो नमो नमः

श्रीमद्विजयनेमिसूरिभ्यो नमो नमः

अथ स्तुतिकल्पलतायाम्

द्वितीयान्तपद्माचार्याष्टकम् ॥

श्री नेमिसूरिं गतदोषसङ्गं मेघौघगम्भीरविनादवक्त्रम् ॥
स्फूर्जत्प्रतापं गुणिलोकनन्दं श्रेयोनिधिं स्तौमि वरं मुनीशम् ॥ १ ॥
लावण्यगेहं सुखसस्यमेघमज्ञानदावानलदाहनीरम् ॥
भव्यावलीसेवितपादपद्मं श्रीनेमिसूरिं प्रणमामि धीरम् ॥ २ ॥
सिद्धान्तशास्त्रावलिमर्मबोधं संसारनीरेश्वरपारपोतम् ॥
विश्वोपकारं गुणिलोकसारं श्रीनेमिसूरिं प्रणमामि धीरम् ॥ ३ ॥
विश्वे प्रपूज्यं शमशान्तवृत्तिं सद्बोधदातारमतिप्रधानम् ॥
तीर्थङ्करस्तोत्रविलुब्धचित्तं श्रीनेमिसूरिं प्रणमामि धीरम् ॥ ४ ॥

श्वेताम्बरौघाब्धिविकासचन्द्रं दुःग्वानखौघप्रशमाब्दतुल्यम् ॥
मायात्रियामारविज्ञासपक्षं श्रीनेमिसूरिं प्रणमामि धीरम् ॥ ५ ॥
श्रीमत्तपोगच्छसुराध्वसूर्यं शुभोपदेशामृतवारिवाहम् ॥
श्रीसज्जनैर्वन्दितपादपद्मं श्रीनेमिसूरिं प्रणमामि धीरम् ॥ ६ ॥
कल्याणविध्वंसकमोहरेणुध्वंसप्रचण्डानिलसोदरश्च ॥
चित्राणमासं स्थिरतामुदारां श्रीनेमिसूरिं प्रणमामि धीरम् ॥ ७ ॥
कल्याणवारीश्वरशृङ्गिचन्द्रमाचारमार्गौघनिरूपकन्तम् ॥
श्रीवीरवाक्यानुविधायकं च श्रीनेमिसूरिं प्रणमामि धीरम् ॥ ८ ॥
वीरं सदा दुर्नयपङ्कजालीप्रालेयकल्पातुलवाग्विलासम् ॥
पूज्यं यशोवार्धिविकासचन्द्रम् श्रीनेमिसूरिं प्रणमामि धीरम् ॥९॥

इति पद्वाक्यप्रमाणपारावारपारीणाचार्यवर्यश्रीमद्विजयनेमिसूरीश्वरशिष्यप्रवर्तकयशोविजयप्रणीतम्
द्वितीयान्तपद्याचार्याष्टकम् ॥

श्रीमद्विजयनेमिसूरिभ्यो नमो नमः

अथ स्तुतिकल्पलतायाम्

गुप्तक्रियापदमाचार्याष्टकम् ॥

गुप्तेन्द्रियं सकलशास्त्रमहाब्धिमन्थबुद्धिप्रभावसमवाप्तपवित्रबोधम् ॥
गुप्तक्रियापदमयेन च मुक्तकेन श्लोकाष्टकेन महयामि सुमेन नेमिम् ॥ १ ॥
श्रीवीरनाथवरवाक्यरसानुसारिन् मिथ्याप्रपञ्चरचनारहितप्रचार ॥
दुर्बोधलोकवरबोधकरप्रताप चारित्रपात्र सततं शरणं व्रजे त्वाम् ॥ २ ॥

भ्वादिगणपठितश्वनेगू यात्ना इत्यस्य अस्मदर्थोत्तमपुरुषैकवचने "व्रजे" इति रूपम्

श्रीदेहकान्तिकलनाविधुरेव साक्षात् द्राक्षानवाक्यरसकप्रथितप्रनाथ ॥
श्रीमन्नयावलिविदाप्रतिमाकृते त्वम् नड्कर प्रतिदिनं शमशान्तवृत्ते ॥ ३ ॥

भ्वादिगणपठितगर्वेथर्द्दिनः अत्र स्वरूपमतिशालिश्रीनिरुत्थनगमननयेन श्रवगम्यामर्थयानना(?)कि‍रेच्छार्थीयस्या-

लिङ्गनहिंसादानभासवृद्धिषु इत्यस्य पञ्चमीविभक्त्याः हौ मत्यये परे "अव" इति रूपम् ॥
अथवा भ्वादिगणपाठितत्वेन डुकृंञ् करणे इत्यस्य पञ्चम्यां हौ मत्यये परे कर इत्यपि रूपमत्र गुप्तक्रियापदतया- बोध्यम् ॥

यत्पादपङ्कजमथो विबुधाश्रयस्स्यात् पापौघशान्तिकरणं हरणं मदस्य ॥
पुण्यप्रजावपरिबोधितभिक्षुवृन्दम् तन्नेमिसूरिवरमाशु वरं प्रणव्यम् ॥४॥

भ्वादिगणपठितोभयपदिनः श्रिञ्सेवायामित्यस्य ह्रस्वकार पञ्चमीविभक्त्यां हिमत्ययेपरे "आश्रय" इति रूपम् श्रीमद्धेमचन्द्राचार्योक्तस्य मथमाध्यायस्य तृतीयपादपठितेन "अदीर्घाद्विरामैक व्यञ्जने" इत्यनेन असंयुक्तव्यञ्जने यकारे परे द्वित्वं वेदितव्यमत्र ॥

कस्येह दुःखजरनाशकरा गदीरनाणी न च श्रुतिसुखा विबुधाग्रगानाम्
सौख्यालयं विबुधजातविवन्दितन्तम् श्रेयोनिधिं समयवेदकमाप्तसूरिम् ॥५॥

भ्वादिगणपठितपरस्मैपदिनः 'इं दुं द्रुं श्रुं सुं गतौ' इत्यस्य पञ्चमी विभक्त्या हौ मत्यये परे सम्पूर्वकस्य समय इति रूपमत्र गुप्तक्रियापदतया वेदितव्यम्

यद्ध्याननाजम्मननं मनुष्या शर्मापदं नाकिगजमार्गम् ॥
प्राप्नन्ति सौख्याश्रयमासदीसं नुमिन्तु नं मोक्षकरं महनम् ॥ ६ ॥

[illegible]

स्वामिवाचकः [illegible] ॥

श्री नेमिसूरीश्वरराजमुख्य पुण्योघराजाऽद्य दिने दिने मे
भूमण्डलेऽत्र विमुक्तदेह श्रीवीरनस्नाह्सिमेत्र पूज्य ॥ ७ ॥

दिवादिगणरविनरम्भंसदिनः [illegible]

इति [illegible]

नेमे बुधस्याप्तजनाब्धिपोत पापानि दुःखैकनिबन्धनानि
कल्याणवल्लीसुवितानानाद् शम्भयशोवृद्धिवितानक स्यम ॥ [illegible]

दिवादिगणपठितपदधातोः षोऽन्तकर्मणि इत्यस्य धातोः पञ्चम्या विभक्त्या हौ प्रत्यये परे ओतःश्ये इति ओकारलोपे कृते स्य इति रूपमत्र अथ प्रकरणवशात् क्रियागुप्तादिलक्षणं लिख्यते

क्रियादिकं स्थितं यत्र पदसन्धानकौशलात्
स्फुटं न लभ्यते तच्च क्रियागुप्तादिकं यथा

क्रिया इति क्रियापदं गुप्तं यस्मिन् तत् क्रियागुप्त आदिर्यस्मिन् तत् क्रियागुप्तादिकम् । आदिशब्देन । "क्रिया कर्तृ च सम्बन्धगुप्तान्यामन्त्रितस्य च । गुप्तं तथा क्रियायस्य लिङ्गस्य वचनस्य च" ॥ गुप्तिरूपस्य द्वयस्य वचनस्य च कारकाणि 'कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याहुः कारकाणि षट् ॥

राजन्नवघनश्यामनिस्त्रिंशाकर्षदुर्जयः ।
श्याकल्पं वसुधामेतां विद्विषोऽथरणे बहून् ॥
पुंस्कोकिलकुलस्यैते नितान्तरुः रावैः ।
सहकारद्रुमा रम्या वसन्ते कः पि श्रियम् ॥

गजघटघनश्याम इत्यत्र 'अत्र' विद्विषोत्करणे इत्यत्र च, नितान्तमघु रार्वरित्यत्र अयुः ॥

इति सागसागरविचारचातुर्यचमत्कृतसहृदयहृदयश्रीमद्विजयनेमिसूरिशिष्यप्रवर्तकश्रीविजयप्रणीतायां स्तुतिकल्पलतायाम्

गुरुक्रियापदमाचार्याष्टकं स्वगुरुस्तोत्रम् ॥

इति श्रीदनाथीमाल्लिगणिर्वंशावतंसश्रीमज्ञानगरवास्तव्यनानाविधधर्मकर्मधुरीणश्रीरत्नजीर्यारत्नीत्य-भिधानश्रेष्ठिवर्येण मुद्रापितमिदम्पुस्तकम्

